
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M-2694

शिर्षक	ग्रंथकार	विषय	विस्तार (पुर्ण/ अपूर्ण)	टिकाकार	आकार	पृष्ठे	लिपी	सामग्री	Lines per page	Letters per line	Condition & age (शके/विक्रम सवंत)	Additional Particulars / Remark
श्री. रामायण अरण्यकांड	हरिराम वर्मा	पुराण	पूर्ण	-	5/12	105 104	संस्कृत	कागद	12	37		

अध्यात्मरामा० उत्तरकांडप्रारंभः

अ॰ रा॰ उ॰
१

श्री गणेशायनमः ॥ १ मध्येपुरे ॥ २ ॥ ३ कथंकेनप्रकारेण ॥ ४ ॥ श्रद्दधत्याः एतच्छ्रवणे श्रद्धावंताः कथामृतमा
स्वाद्यमेममतदास्वादनविषयालस्याऽसंतेवर्द्धते ॥ ५ ॥ रामेराज्यमुपस्थितेराज्यंप्राप्तवतीत्यर्थः ॥ अभिवं

श्री॰ ॥ जयतिरघुवंशतिलकः कौसल्याहृदयनंदनोरामः ॥ दशवदननिधनकारी दाशरथिः पुंड
रीकाक्षः ॥ १ ॥ श्रीपार्वत्युवाच ॥ अथरामः किमकरोत्कौसल्यानंदवर्द्धनः ॥ हत्वामृधेरावणादी
न्राक्षसान्भीमविक्रमान् ॥ २ ॥ अभिषिक्तस्त्वयोध्यायामासीतयासहराघवः ॥ मायामानुषतां प्रा
प्य कतिवर्षाणि भूतले ॥ ३ ॥ स्थितवान्लीलयादेवः परमात्मासनातनः ॥ अत्यजन्मानुषंलोकं
कथमंतेरघूद्वहः ॥ ४ ॥ एतदाख्याहि भगवन्श्रद्दधत्याममप्रभो ॥ कृपापीयूषमास्वाद्यतृप्तास्मेऽती
ववर्द्धते ॥ रामचंद्रस्य भगवन्ब्रूहि विस्तरशः कथां ॥ ५ ॥ श्रीमहादेवउवाच ॥ राक्षसानांवधंकृ
त्वाराज्येरामउपस्थिते ॥ आययुर्मुनयः सर्वे श्रीराममभिवंदितुं ॥ ६ ॥ विश्वामित्रोऽसितः कण्वो
दुर्वासाभृगुरंगिराः ॥ कश्यपोवामदेवोत्रिस्तथासप्तर्षयोमलाः ॥ ७ ॥ अगस्त्यः सहशिष्यैश्च
मुनिभिः सहितोभ्यगात् ॥ द्वारमासाद्यरामस्य द्वारपालमथाब्रवीत् ॥ ८ ॥

दितुंस्तोतुंनंतुंच ॥ ६ ॥ तानेवऋषीनाह विश्वामित्रइति ॥ ७ ॥ मुनिभिः शिष्यैः सहितइत्यर्थः ॥ ८ ॥ ॥

मा॰ ५

प॰ ७

राम॰
१

अगस्त्यप्रमुखामुनयः॥आशीर्भिरभिनंदितुं समागस्य वहिस्थिताः संतीति रामाय ब्रूहीत्यन्वयः॥९॥१०॥कृतां
जलिं प्रतिघोषः॥प्राप्तः स्वाश्रमादागतः बहिर्द्वारिउपस्थितोस्तीति शेषः॥११॥पूजिताः प्रतिहारेणमार्गद
र्शनादिना पूजिताः॥कृतादरणइतियावत्॥१२॥गां मधुपर्कार्घ्यार्थं वृषभं च महोक्षं वा महाजं वा श्रोत्रियामो

ब्रूहि रामाय मुनयः समागम्य बहिः स्थिताः॥अगस्त्यप्रमुखाः सर्वे आशीर्भिरभिनंदितुं॥९॥
प्रतीहारस्ततो राममगस्त्यवचनाद्द्रुतं॥नमस्कृत्वाब्रवीद्वाक्यं विनयावनतः प्रभुं॥१०॥कृ
तांजलिरुवाचेदं अगस्त्यो मुनिभिः सह॥देवत्वद्दर्शनार्थाय प्राप्तो बहिरुपस्थितः॥११॥तमु
वाच द्वारपालं प्रवेशय यथासुखं॥पूजितो विविशुर्वेश्म नानारत्नविभूषितं॥१२॥दृष्ट्वा रा
मो मुनीन्शीघ्रं प्रत्युत्थाय कृतांजलिः॥पाद्यार्घ्यादिभिरापूज्य गां निवेद्य यथाविधि॥१३॥न
त्वा तेभ्यो ददौ दिव्यान्यासनानि यथार्हतः॥उपविष्टाः प्रहृष्टाश्च मुनयो रामपूजिताः॥१४॥सं
पृष्टकुशलाः सर्वे रामं कुशलमब्रुवन्॥कुशलं ते महाबाहो सर्वत्र रघुनंदन॥१५॥दि
ष्ट्येदानीं प्रपश्यामो हतशत्रुमरिंदम॥न हि भारः स ते राम रावणो राक्षसेश्वरः॥१६॥

प्रकल्पयेदितिस्मृतेः॥१३॥यथार्हतः॥अर्हो योग्यतातदनतिक्रमादित्यर्थः भगवत्तः सकाशात्पूजा लब्धा
येन महर्षिः॥१४॥अब्रुवन् अपृच्छन् तमेवाभिनयति कुशलमित्यादि॥१५॥स रावणस्तेन भारः क्लेशावधो

रा०टि० उत्तरकां० स० १॥५

अ॰ उ॰
२

सुकरत्वमेवदर्शयति सधनुरिति इंद्रजितं सस्त्वाहुः दिष्ट्येति ॥१७॥ तदेवस्पष्टयति सह्यमिति रावणेर्मेनाः
स्य ॥१८॥१९॥ सा दक्षिणा पुरा दत्ता दातुं प्रतिज्ञाता रक्षोगणान् हत्वा पूर्णीकृता अतकृतकृत्यः सन् जीवसि

सधनुस्त्वं हि लोकांस्त्रीन्विजेतुं शक्त एव हि ॥ दिष्ट्या त्वया हताः सर्वे राक्षसा रावणादयः ॥१७॥
सह्यमेतन्महाबाहो रावणस्य निबर्हणं ॥ असह्यमेतत्संग्रामे रावणेर्यन्निषूदनं ॥१८॥ अंतकप्र
तिमाः सर्वे कुंभकर्णादयो मृधे ॥ अंतकप्रतिमैर्बाणैर्हतास्ते रघुसत्तम ॥१९॥ दत्ता चेयं त्वयास्माकं
पुरा ह्यभयदक्षिणा ॥ हत्वा रक्षोगणान्संख्ये कृतकृत्योद्य जीवसि ॥२०॥ श्रुत्वा तु भाषितं तेषां
मुनीनां भावितात्मनां ॥ विस्मयं परमं गत्वा रामः प्रांजलिरब्रवीत् ॥२१॥ रावणं दीनतिक्रम्य कुं
भकर्णादिराक्षसान् ॥ त्रिलोकजयिनो हित्वा किं प्रशंसथ रावणिं ॥२२॥ ततस्तद्वचनं श्रुत्वा रा
घवस्य महात्मनः ॥ कुंभयोनिर्महातेजा रामं प्रीत्या वचोब्रवीत् ॥२३॥ शृणु राम यथावृत्तं
रावणे रा वणस्य च ॥ जन्म कर्म वरादानं संक्षेपाद्वदतो मम ॥२४॥ पुरा कृतयुगे राम पुलस्त्यो
ब्रह्मणः सुतः ॥ तपस्तप्तुं गतो विद्वान्मेरोः पार्श्वे महामतिः ॥२५॥ तृणबिंदोराश्रमे सोन्यवसन्मु
निपुंगवः ॥ तपस्तेपे महातेजाः स्वाध्यायनिरतः सदा ॥२६॥ तत्राश्रमे महारम्ये देवगंधर्वकन्यकाः
गायंत्यो नन्तुस्तत्र हसंत्यो वादयंति च ॥२७॥

५ त्वमेव जीवसि तव जीवनमेव श्लाघ्यं जीवनमित्यर्थः
२०॥२१॥२२॥२३॥ यथावृत्तं जानं तथा शृणु ॥२४॥२५॥ मुनिपुंगव मुनिश्रेष्ठः सन् अवसन्न्यवसत्तेपे च ॥२६॥२७॥

राम॰
२

तत्र विघ्नं चक्रुर्गाननृत्यादिभिरिति शेषः ॥२८॥२९॥ अपश्यतीत्यत्र नुमभाव आर्षः ॥३०॥ व्यंजितः प्रकटीकृतोंतः

पुलस्त्यस्य तपोविघ्नं चक्रुः सर्वा अनिंदिताः ॥ ततः क्रुद्धो महातेजा व्याजहार वचो महत् ॥२८॥
या मे दर्शनमागच्छेत्सा गर्भं धारयिष्यति ॥ ताः सर्वाः शापसंविग्ना न तं देशं प्रचक्रमुः ॥२९॥
तृणबिंदोस्तु राजर्षेः कन्या तन्नाशृणोद्वचः ॥ विचचार मुनेरग्रे निर्भया तमपश्यती ॥३०॥ ब-
भूव पांडुरतनुर्व्यंजितांतःशरीरजा ॥ दृष्ट्वा सा देहवैवर्ण्यं भीता पितरमन्वगात् ॥३१॥ तृण-
बिंदुश्च तां दृष्ट्वा राजर्षिरमितद्युतिः ॥ ध्यात्वा मुनिकृतं सर्वमवैद्विज्ञानचक्षुषा ॥३२॥ तां कन्यां
मुनिवर्याय पुलस्त्याय ददौ पिता ॥ तामग्रह्याब्रवीत्कन्यां बाढमित्येव सद्विजः ॥३३॥ शुश्रूष-
णपरां दृष्ट्वा मुनिः प्रीतोऽब्रवीद्वचः ॥ दास्यामि पुत्रमेकं ते उभयोर्वंशवर्धनं ॥३४॥ ततः प्रासू-
त सा पुत्रं पुलस्त्याल्लोकविश्रुतं ॥ विश्रवा इति विख्यातः पौलस्त्यो ब्रह्मविन्मुनिः ॥३५॥ तस्य शी-
लादिकं दृष्ट्वा भरद्वाजो महामुनिः ॥ भार्यार्थं स्वां दुहितरं ददौ विश्रवसे मुदा ॥३६॥ तस्यां तु
पुत्रः संजज्ञे पौलस्त्याल्लोकसंमतः ॥ पितृतुल्यो वैश्रवणो ब्रह्मणा चानुमोदितः ॥३७॥ ॥

मध्ये शरीरजो गर्भो यस्याः सा ॥३१॥ अवैत अज्ञानात् ॥३२॥३३॥ उभयोर्मातापित्रोः ॥३४॥ यां प्रासूत ते स विश्रवा इ-
ति विख्यात इत्यर्थः ॥३५॥ शीलमुत्तमस्वभावः ॥३६॥ वैश्रवणः कुबेरः ॥३७॥

तत्तपसातस्य मनोभिलषितं धनेशत्वरूपं ददौ॥ ३८॥ ३९॥ प्राह पितरमिति कस्मैचिदंददत्वेत्यस्य स्थानं न दत्तवानित्य
नेनान्वयः॥ ४०॥ हिंसापीडा यत्र कस्यापि स्थानं नास्ति तादृशं वदेत्यर्थः॥ ४१॥ ४२॥ अन्यैरिपुभिः दुःप्रधर्षा॥ ४३॥

ददौ तत्तपसा तुष्टो ब्रह्मा तस्मै वरं शुभं॥ मनोभिलषितं तस्य धनेशत्वमखंडितं॥ ३८॥ ततो लब्ध
वरः सोपि पितरं द्रष्टुमागतः॥ पुष्पकेन धनाध्यक्षो ब्रह्मदत्तेन भास्वता॥ ३९॥ नमस्कृत्वा प्यपितरं
निवेद्य तपसः फलं॥ प्राह मे भगवान् ब्रह्मा दत्वा वरमनिंदितं॥ ४०॥ निवासायन मे स्थानं दत्त
वान्परमेश्वरः॥ ब्रूहि मे नियतं स्थानं हिंसा यत्र न कस्यचित्॥ ४१॥ विश्रवा अपि तं प्राह लंका
नाम पुरी शुभा॥ राक्षसानां निवासाय निर्मिता विश्वकर्मणा॥ ४२॥ त्यक्ता विष्णुभयाद्दैत्यावि
विशुस्ते रसातलं॥ सा पुरी दुष्प्रधर्षान्यैर्मध्ये सागरमास्थिता॥ ४३॥ त्यक्ता विष्णुभयाद्दैत्या
विविशुस्ते रसातलं॥ सा पुरी दुःप्रधर्षान्यैर्मध्ये सागरमास्थिता॥ तत्र वासाय गच्छ त्वं नो मेः
साधिष्ठिता सुरा॥ पित्रादिष्टस्त्वसौ गत्वा तां पुरीं धनदो विशत्॥ ४४॥ स तत्र सुचिरं कालमुवा
सपितृसंमतः॥ कस्यचित्त्वथ कालस्य सुमाली नाम राक्षसः॥ ४५॥ रसातलान्मर्त्यलोकं
चचार पिशिताशनः॥ गृहीत्वा तनयां कन्यां साक्षाद्देवीमिव श्रियं॥ ४६॥

पुरा दैत्यानां रसातलप्रवेशोत्तरमितः प्रागित्यर्थः॥ ४४॥ ४५॥ ४६॥ श्रीरामायनमो नमः॥ श्रीराम

॥४७॥४८॥ ८ह्यसे मा र्थ्यसि क्वचित्तथैव पाठः॥४९॥ईदृशा इत्यस्यैव विवरणं धनदेनसमा इति॥५०॥सा आश्रममिति छेदः लज्जावशात् भूलिखनादि॥५१॥का किंजातीया कन्यासि उत्तविवाहितासि इति प्रश्नः॥५२॥५३॥५४

अपश्यद्धनदं देवं चरंतं पुष्पकेन सः॥ हिताय चिंतयामास राक्षसा नाम हामना॥४७॥उवाच तनयां तत्र कैकसीनाम नामतः॥ वत्से विवाहकालस्ते यौवनं चाति वर्त्तते॥४८॥ प्रत्याख्याना द्भीतैस्त्वं न वरैर्गृह्यसे शुभे॥ सात्वं वरय भद्रं ते मुनिं ब्रह्मकुलोद्भवं॥४९॥स्वयमेव ततः पुत्राभविष्यंति महाबलाः॥ ईदृशाः सर्वशोभाढ्या धनदेन समाः शुभे ५०॥ तथेति साश्रमं गत्वा मुनेरग्रेव्यवस्थिता॥ लिखंती भुवमग्रेण पादेनाधोमुखी स्थिता॥५१॥ तामपृच्छन्मुनिः कात्वं कन्यासि वरवर्णिनि॥ साब्रवीत्तां जलिर्भूत्वा ध्यानेन ज्ञातुमर्हसि॥५२॥ ततो ध्यात्वा मुनिः सर्वं ज्ञात्वा तां प्रत्यभाषत॥ ज्ञातं तवाभिलषितं मत्तः पुत्रानभीप्ससि॥५३॥दारुणायां तु वेलायामागतासि सुमध्यमे॥ अतस्ते दारुणौ पुत्रौ राक्षसौ संभविष्यतः॥५४॥साब्रवीन्मुनिशार्दूल त्वत्तोप्येवंविधौ सुतौ॥ तामाह पश्चिमो यस्ते भविष्यति महामतिः॥५५॥ महाभागवतः श्रीमान् रामभक्त्येकतत्परः॥ इत्युक्ता सा तथाकाले सुषुवे दशकंधरं॥५६॥

॥ त्वत्तोप्येवंविधौ सुतौ विसदृशा का कुत्र्यस्ते पुत्रो भविष्यति सं महामतिर्भविष्यतीत्यर्थः॥५५॥तदेवाह महाभागवत इति रामभक्त्येकत्परस्य ~~इति तत्परः~~ सूक्त इतिशेषः एकस्मिन् तस्मिन्नेव तत्परः

अ०उ०
४

रक्षोजातमात्रेण तस्य रक्षसो जन्ममात्रेनेत्यर्थः ॥५७॥ नाशहेतून् निरक्षोवंशस्य लोकानां तस्मिन्नेव तत्परः सससर्वदाद
त्तचित्तः रक्षोजातमात्रेण तस्य रक्षसो जन्ममात्रेनेत्यर्थः ॥५७॥ नाशहेतून् निरक्षोवंशस्य लोकानां चेति शेषः ॥५८॥५९॥ स्वा
ध्यायी वेदाध्ययनवान् नित्यकर्माग्निहोत्रादि संतुष्टचेतसः ॥ अतिशांतान् इत्यर्थः भक्षयन्निलनेनान्वयः ॥६०॥६१॥

रावणं विंशतिभुजं दशशीर्षं सुदारुणं ॥ तद्रक्षोजातमात्रेण चचाल च वसुंधरा ॥५७॥ बभूवुर्नाश
हेतूनि निमित्तान्यखिलान्यपि ॥ कुंभकर्णस्ततो जातो महापर्वतसन्निभः ॥५८॥ ततः शूर्पणखा
नाम जाता रावणसोदरी ॥ ततो बिभीषणो जातः शांतात्मा सौम्यदर्शनः ॥५९॥ स्वाध्यायी निय
ताहारो नित्यकर्मपरायणः ॥ कुंभकर्णस्तु दुष्टात्मा द्विजान्संतुष्टचेतसः ॥६०॥ भक्षयन् ऋषि
संघांश्च विचचारातिदारुणः ॥ रावणोपि महासत्वो लोकानां भयदायकः ॥६१॥ बद्धवेलोकना
शाय ह्यस्म यो देहिनामिव ॥ राम त्वं सकलांतरस्थमभितो जानासि विज्ञानदृक् साक्षी सर्वह
दिस्थितो हि परमो नित्योदितो निर्मलः ॥ त्वं लीला मनुजाकृतिः स्वमहिमन्मायागुणैर्नान्यसे
लीलार्थं प्रतिचोदितो घ भवता वक्ष्यामि रक्षोन्वयं ॥६२॥

॥ अमाययोरोगः ॥ सकलांतरस्थं जानासि
सर्वांतर्यामित्वात् तवैव स्फुरयति सर्वहृदिस्थितो हीत्यैतेन हीयंतरस्थत्वे विज्ञानदृक् विज्ञानेन स्वरूपेण
दृक् सर्वद्रष्टा अमेन चित्तादिकारणांतरनैरपेक्ष्यमुक्तं अत एव साक्षी साक्षाद्द्रष्टा नन्वहमनुष्यः कुतो

ए म०
४

ममदृशात्वं तत्राह ॥ त्वं लीलेति वस्तुतो न मनुष्यः स्वमिति भावः स्वमहिमन् स्वमात्रज्ञेयमहिमन् अन्यैस्त्वन्म
हिमा दुर्ज्ञेय इत्यर्थः मायागुणैरजः ॥ आदिभिर्निर्जिप्य सेवस्व ष्टृपसे एवं सर्वज्ञस्य तवाग्रे कथनं यद्यप्यनुचितं त
थापि भगवता लीलार्थं प्रति चोदितः हृष्टो रघोद्भवं वक्ष्यामि रघोद्भव मित्यत्र संधिरार्षः ॥ ६२ ॥ ननु त्वं मामेवं कु
थं ज्ञातवानसीत्यत्राह जानामीति मूढोप्यहं भवदनुग्रहत एवं विशेषण त्वां जानासि अनंतदेशकालापरिच्छे
द्यं अक्षरं अजत्वाभ्यां नाशोत्पत्तिरहितमुक्तं संसारिकान्प्रति गूढं गुप्तं छलं निजरूपं मननं अथापि त्वा मनु

जानामि केवलमनंतमचिंत्यशक्तिं चिन्मात्रमक्षरमजं विदितात्मतत्वं ॥ त्वां राममूढ निजरूप
मनुप्रवृत्तो मूढोप्यहं भवदनुग्रहतश्चरामि ॥ ६३ ॥ एवं वदंतमिनवंशपवित्रकीर्त्तिः कुंभोद्भवं रघु
पतिः प्रहसन्बभाषे ॥ मायाश्रितं सकलमेतदनन्यकत्वान्मत्कीर्त्तनं जगति पापहरं निबोध ॥ ६४

प्रवृत्तः त्वत्प्रतिमार्गमनुप्रवृत्तो योगी इत प्रवृत्तिमार्ग इह लोके चरामि ॥ ६३ ॥ इनवंशः सूर्यवंशो पवित्रा की
र्त्तिर्यस्य सः एतत्सकलमप्युदाहृतमंतर्यामि त्वादि दृश्यमानं जगच्च मायाश्रितमेव तत्र हेतुरनन्यक
त्वात् न विद्यते न्य घस्य सोनन्यकस्तस्य भावस्तत्वं ममता दृशात्वात् ॥ धर्मरहितत्वात् इतिराधारत्वात् दे
रप्यसंभवात् सर्वधर्मत्याज्जोमपि ग्रहमाणं मायाश्रितमेव जानीहीति शेषः स्वावतारस्य मुख्यं प्रयोज
नमाह मत्कीर्त्तनमिति स्वकीर्त्तनद्वारा पापहरणार्थमेवतार इति भावः ॥ ६४ ॥ रामजी ॥ रामजी रामः

अ० उ०
५

१ श्रीरामवचनं श्रुत्वा परमानंदनिर्भरः ॥ मुनिः प्रोवाच सद्दसि सर्वे शांतत्रस्टण्वताम् ॥१॥

इति श्रीमत्सकलराजविपदुद्धरणसमर्थेत्यादिविरुदावली विराजमानस्य हिम्मतिवर्म्मणः पुत्रस्य श्रीराम वर्मणः कृता वध्यात्मरामायणसेतौ उत्तरकांडे प्रथमः सर्गः ॥१॥ अथेति तत्र विश्रवस आश्रमे पितरं विश्र वसं ॥१॥ सामीप्यं गत्वा सामीप्य प्राप्य ॥२॥३॥ अचिरेणेति छेदः ॥४॥ मां पश्य पशिवेन चक्षुषेति शेषः दुष्करं तपः

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे प्रथमः सर्गः ॥१॥ अथ वित्तेश्वरो देव स्तत्र कालेन केन चित् ॥ आययौ पुष्पकारूढः पितरं द्रष्टुमंजसा ॥१॥ दृष्ट्वा तं कैकसी तत्र भ्राजमा नं महौजसं ॥ राक्षसी पुत्र सामीप्यं गत्वा रावणमब्रवीत् ॥२॥ पुत्र पश्य धनाध्यक्षं ज्वलंतं स्वेन तेजसा ॥ त्वमप्येवं यथा भूयास्तथा यत्नं कुरु प्रभो ॥३॥ तच्छ्रुत्वा रावणो रोषात्प्रतिज्ञामक रोद्द्रुतं ॥ धनदेन समो वापि त्वधिको वाचिरेण तु ॥४॥ भविष्यामि न संदेहः संतापं त्यज सुव्रते इत्युक्त्वा दुष्करं कर्तुं तपः स दशकंधरः ॥५॥ आगमत्स्वसिद्ध्यर्थं गोकर्णं तु सहानुजः ॥ स्वं स्वं नियममास्थाय भ्रातरस्ते तपो महत् ॥६॥ आस्थिता दुष्करं घोरं सर्वलोकैकतापनं ॥ दश वर्षसहस्राणि कुंभकर्णोकरोत्तपः ॥७॥ बिभीषणो पि धर्मात्मा सत्यधर्मपरायणः ॥ पंच वर्षसहस्राणि पादेनैकेन तस्थिवान् ॥८॥ दिव्यवर्षसहस्रं तु निराहारो दशाननः ॥ पूर्णे वर्षसहस्रे तु शीर्षमग्नौ जुहाव सः ॥९॥

१ कर्त्तुमित्यन्वयः ॥५॥ फलस्य वांछितस्य सिध्यर्थं सहानु जः कुंभकर्णविभीषणसहितः स्वस्व नियमं स्व स्व वासनोद्भूतं राजसतामससात्विकरूपं ॥६॥ दुष्क

रामः
५

दशमं शिरश्छेत्तुकामस्य प्रजापतिः प्राप्तः समीपमिति शेषः ॥१०॥११॥ हन्त ममरत्वमेव भगवन् दिष्ठा वधात्स्वयमेवध्यग्णेतिसुपर्णेत्यादि ॥१२॥ तथास्त्वित्यस्यावददिति शेषः ॥१३॥ अहं याणि सुपर्णादिकृतक्षयरहितानि

एवं वर्षसहस्राणि नव तस्यातिचक्रमुः ॥ अथ वर्षसहस्रे तु दशमे दशमं शिरः ॥१०॥ छेत्तुकामस्य धर्मात्मा प्राप्तश्चाथ प्रजापतिः ॥ वत्स वत्स दशग्रीव प्रीतोस्मीत्यभ्यभाषत ॥१०॥ वरं वरय दास्यामि यत्ते मनसि कांक्षितं ॥ दशग्रीवोपि तत्छ्रुत्वा प्रहृष्टेनांतरात्मना ॥११॥ अमरत्वं वृणोमीशावर हीयदि मे भवान् ॥ सुपर्णनागयक्षाणां देवतानां तथासुरैः ॥ अवध्यस्त्वंतु मे देहि तृणाभूताहि मानुषाः ॥१२॥ तथास्त्विति प्रजाध्यक्षः पुनराह दशाननं ॥ अग्नौ हुतानि शीर्षाणि यानि ते सुरपुंगव ॥१३॥ भविष्यंति यथापूर्वमक्षयाणि च सत्तम ॥१४॥ एवमुक्त्वा ततो राम दशग्रीवं प्रजापतिः ॥ विभीषणमुवाचेदं मणितं भक्तवत्सलः ॥१५॥ विभीषण त्वं यावत्सन्नतेधर्मार्थमुत्तमं ॥ तपस्ततो वरं वत्स वृणीष्वाभिमतं हितं ॥१६॥ विभीषणोपितं नत्वा प्रांजलिर्वाक्यमब्रवीत् ॥ देवमे सर्वदा बुद्धिर्धर्मे तिष्ठतु शाश्वती ॥१७॥ मारीच परध धर्मे मे बुद्धिः सर्वत्र सर्वदा ॥ ततः प्रजापतिः प्रीतो विभीषणमथाब्रवीत् ॥ वत्स त्वं धर्मशीलोसि तथैव च भविष्यसि
॥१८॥

१४॥ विषयवुद्धिप्राप्तिकामनया तपः कर्त्तव्या दादरेणावसेति द्विसंबंधनं ॥१६॥ तदेवाह ॥ देवमेत्यादि ॥१७

नचैववधमिष्यसिधर्मबुद्धिरेवभविष्यसि ॥१८॥

णा एणादेव प्रार्थितया ॥२०॥२१॥ आस्यादिति छेदः अहो विधिर्दुर्लंघ्य इति शेषः ॥२१॥ वरलब्ध्वा प्राप्तवरान् पौत्रान् पुत्री पुत्रान् विरादादित्वादत्र प्राया प्राव एणा दि समीपमिति शेषः ॥२३॥ मे वांछितो मनोरथो स्ते दिष्ट्या संवृत्तः ॥२४॥ अतो यभ्द्रयादिति तद्धि स्नुहृतं भयं नोस्माकं गतं सर्वाविध्यत्वस्य त्वयाप्राप्तवान् ॥२५॥ इयं त्वंकापूर्वमस्माभिरूषिता

अयाचितोपिते दास्येद्य मरत्वं बिभीषण ॥ कुंभकर्णमथोवाच वरं वरय सुव्रत ॥१९॥ वाणा प्राप्तोपतं प्राह कुंभकर्णः पितामहं ॥ स्वप्स्यामि देववर्षाणि मासान् दिन मे वं तु भोजनं ॥२०॥ एवमस्त्विति तं प्राह ब्रह्मा दृष्ट्वा दिवौकसः ॥ सरस्वती च तद्वक्त्रान्निर्गता प्रययौ दिवं ॥२१॥ कुंभकर्णस्तु दुष्टात्मा चिंतयामास दुःखितः ॥ अनभिप्रेतमेवास्यात्किं निर्गतमहो विधिः ॥२२॥ सुमाली वरलब्ध्वान्स्तान् ज्ञात्वा पौत्रान्निशाचरान् ॥ पातालान्निर्भयः प्रायात्प्रहस्तादिभिरन्वितः ॥२३॥ दशाग्रीवं परिष्वज्य वचनं चेदमब्रवीत् ॥ दिष्ट्या ते पुत्र संवृत्तो वांछितो मे मनोरथः ॥२४॥ यद्भयाद्वयं लंकां त्यक्त्वा याता रसातलं ॥ तद्गतं नो महाबाहो महद्विष्णुकृतं भयं ॥२५॥ अस्माभिः पूर्वमुषितां लंकेयं धनदेन ते ॥ भ्रात्राक्रांता त्विदानीं त्वं प्रत्यानेतुमिहार्हसि ॥२६॥ साम्नावाथ बलेनापि राज्ञां बंधुः कुतः सुहृत् ॥ इत्युक्तो रावणः प्राह नार्हस्येवं प्रभाषितुं ॥२७॥

अनेनास्मत्संवंधादियं तत्र धनभूतेति ध्वनितं इदानीं ते भ्रात्रा धनदेनाक्रांतां त्वं प्रत्यानेतुं स्वाधीनां कर्तुमर्हसि ॥२६॥ ननु ज्येष्ठे भ्रातरि कथमवलं योग्यं तत्राह राज्ञां बंधुः कुतः सुहृत् कुतः सर्वथैवानुपमद्यैव राज्यम

१४८

शृणु रावण यत्नेन नैवं त्वं वक्तुमर्हसि ॥ नाधीता राजधर्मास्ते नीतिशास्त्रं तथैव च ॥ २९ ॥

एवं श्रुत्वा एवं रावणवाक्यं श्रुत्वेत्यर्थः ॥ २८ ॥ सौभ्रात्रं भ्रातृत्वादिप्रीतिः ॥ २९ ॥ दैवैरनुष्ठितं लंकाहरणरूपं वैरमिदानीं त्वतमेव न क्रिंतु प्राचीनमेव एवं च तैरस्मद्वेषकरणवदस्माकमपि तद्वेषकरणं तद्दोषायेति भावः ॥ ३० ॥ दुरात्मनः प्रहस्तस्येत्यन्वयः ॥ ३१ ॥ धनदनामनीश्वरं निष्काश्य ॥ ३२ ॥ धवदः तम्नतगमनोत्तरं पितृसमीपं गत्वा रावण

वित्तेशो गुरुरस्माकमेवं श्रुत्वा तमब्रवीत् ॥ प्रहस्तः प्रश्रितं वाक्यं रावणं दशकंधरं ॥ २८ ॥ शूराणां न हि सौभ्रात्रं शृणु मेवदतः प्रभो ॥ कश्यपस्य सुता देवा राक्षसाश्च महाबलाः ॥ २९ ॥ परस्परमयुध्यंत तस्त्कासौ हृदमायुधैः ॥ नैवेदानीतनं राजन्वैरं दैवैरनुष्ठितं ॥ ३० ॥ प्रहस्तस्य वचः श्रुत्वा दशग्रीवो दुरात्मनः ॥ तथेति क्रोधाताम्राक्षस्त्रिकूटाचलमन्वगात् ॥ ३१ ॥ दूतं प्रहस्तं संप्रेष्य निष्कास्य धनदेश्वरं ॥ लंकामाक्रम्य सचिवै राक्षसैः सुखमास्थितः ॥ ३२ ॥ धनदः पितृवाक्येन त्यक्त्वा लंकां महायशाः ॥ गत्वा कैलासशिखरं तपसा तोषयच्छिवं ॥ ३३ ॥ तेन सख्यमनुप्राप्य तेनैव परिपालितः ॥ अलकां नगरीं तत्र निर्ममे विश्वकर्मणा ॥ दिक्पालत्वं च कारात्र शिवेन परिपालितः ॥ रावणो राक्षसैः सार्धमभिषिक्तः सहानुजैः ॥ ३४ ॥

एवमाहात्र किमुचितमिति पृष्टवान् तेन च त्याग एवोचितास्याबध्यत्वादित्युक्ते तां त्यक्तवानिति गाथा पौराणिकी ॥ ३३ ॥ निर्ममे कारितवान् रावणोनुजैः सार्धं राक्षसैरभिषिक्तः लंकाराज्यइति शेषः ॥ ३४

असुराणां तदवताररूपक्षसां यद्वा क्रूरकर्मत्वाद्रक्षसः स्वप्न सुरपदप्रयोगः एवमसुरेष्वपि राक्षसपदप्रयोग इतिबो
ध्यं कालखंजाय तद्दंशायनाम्ना विद्युज्जिह्वाय भगिनी शूर्पनखां ॥२५॥ राक्षसानां विश्वकर्मा दितेः सुतो मयः

राज्यं चकारासुराणां त्रिलोकीं बाधयन्बलः ॥ भगिनीं कालखंजाय ददौ विकटरूपिणीं ॥(३५)॥ विद्युज्जि
ह्वाय नाम्नासौ महामायी निशाचरः ॥ ततो मयो विश्वकर्मा राक्षसानां दितेः सुतः ॥३६॥ सुतां मं
दोदरीं नाम्ना ददौ लोकैकसुंदरीं ॥ रावणाय पुनः शक्तिममोघां प्रीतमानसः ॥३७॥ वैरोचनस्य
दौहित्रीं वृत्रज्वालेति विश्रुतां ॥ स्वयंदत्तामुदवहत्कुंभकर्णाय रावणः ॥३८॥ गंधर्वराजस्य
सुतां शैलूषस्य महात्मनः ॥ विभीषणस्य भार्यार्थे धर्मज्ञां समुदावहत् ॥३९॥ सरमां नाम
सुभगां सर्वलक्षणसंयुतां ॥ ततो मंदोदरी पुत्रं मेघनादमजीजनत् ॥४०॥ जातमात्रः स्फयोना
दं मेघवत्समुमोच ह ॥ ततः सर्वेऽब्रुवन्मेघनादोऽयमिति चाह्वयत् ॥४१॥ कुंभकर्णस्ततः प्राह नि
द्रा मां बाधते प्रभो ॥ ततश्चकारयामास गुहां दीर्घां सुविस्तरां ॥४२॥ तत्र सुष्वाप मूढात्मा कुंभक
र्णो विघूर्णितः ॥ निद्रिते कुंभकर्णे तु रावणो लोकरावणः ॥४३॥ श्रीरामायनमोनमः ॥ ॥ छ ॥

मंदोदरीं कन्यां रावणाय ददौ पुनः शक्तिं चामोघां स्वनिर्मितां ददौ ॥३६॥३७॥ स्वयंदत्तामिति तत्पित्रेति शेषः
३८॥३९॥४०॥ मेघनादेति नाम्नोऽन्वर्थत्वमाह जातमात्र इति ॥४१॥४२॥ ४३॥ ॥ रामायनमोनमः ॥

देत्याद्दीन्समहोरगान्निजघ्नेदेवश्रियश्चेतिजघ्ने हतवानित्यर्थः देवस्त्रियइतिपागंतरं ॥ ४४ ॥ आक्रमंदेवादिष्व
न्यायाचरणं ॥ ४५ उत्तमपुष्पकंवाहनेषूत्तमंपुष्पकाख्यंवाहनमित्यर्थः स्वर्गलोकंमेरूर्ध्वस्थितंपाक्कलोकं

ब्राह्मणान्ऋषिमुख्यांश्चदेवदानवकिन्नरान् ॥ देवश्रियोमनुष्यांश्चनिजघ्नेसमहोरगान् ॥ ४४ ॥
धनदोपिततःश्रुत्वारावणस्याक्रमंप्रभुः ॥ अधर्मंमाकुरुष्वेतिदूतवाक्यैन्यवारयत् ॥ ४५ ततः
क्रुद्धोदशग्रीवोजगामधनदालयं ॥ विनिर्जित्यधनाध्यक्षंजहारोत्तमपुष्पकं ॥ ४६ ततोय
मंचवरुणंनिर्जित्यसमरेसुरः ॥ स्वर्गलोकमगात्तूर्णंदेवराजजिघांसया ॥ ४७ ततोभवन्म
हघुद्धमिंद्रेणासहदैवतैः ॥ ततोरावणमभ्येत्यबबंधत्रिदशेश्वरः ॥ ४८ तच्छ्रुत्वासहसागत्य
मेघनादःप्रतापवान् ॥ कृत्वाघोरंमहद्युद्धंजित्वात्रिदशपुंगवान् ४९ इंद्रंगृहीत्वाबध्वासोमे
घनादोमहाबलः ॥ मोचयित्वातुपितरंगृहीत्वेंद्रंययौपुरं ॥ ५० ब्रह्मातुमोचयामासदेवें
द्रंमेघनादतः ॥ दत्वावरान्बहूंस्तस्मैब्रह्मास्वभवनंययौ ॥ ५१ ॥ रावणोविजयीलोकान्स
र्वान्जित्वाक्रमेणतु ॥ कैलासंतोलयामासबाहुभिःपरिघोपमैः ॥ ५२ ॥ ७ ॥ ७ ॥

अनेनयमादिलोकाः ॥ तदधंस्थिताइतिधनमति ॥ ४७ ॥ देवतैःसहितनेंद्रेणरावणस्ययुद्धमभवदित्यर्थः
४८ ॥ ४९ ॥ मघमतइंद्रग्रहणंततस्तस्यबंधनंततोवद्धस्यस्वपुरेआनयनं ॥ ५० ॥ इंद्रमोचनप्रतिदानत्वेनतद

श्रीबिकवचं ॥ ५८ ॥

अ०उ०
८

शापमाह वानरैरिति कोपिनाको पर्वताकैलासचालनादयं कोपः ॥ वानरमुखं नंदीश्वरं दृष्ट्वा रावणेन हसितविस्तितो वा शापः ॥ ५३ ॥ अगणयन् किमस्य शापेन भवितेति गच्छायगणनामकुर्वन् हैहयपत्तनं सहस्रार्जु

तत्र नंदीश्वरेणैवं शप्तोयं राक्षसेश्वरः ॥ वानरैर्मानुषैश्चैव नाशं गच्छेति कोपिना ॥ ५३ ॥ शप्तोप्यगणयन्वाक्यं ययौ हैहयपत्तनं ॥ तेन बद्धो दशग्रीवः पुलस्त्येन विमोचितः ॥ ५४ ॥ ततोपि बलमासाद्य जिघांसुर्हरिपुंगवं ॥ धृतस्तेनैव कक्षेण वालिना दशकंधरः ॥ ५५ ॥ भ्रामयित्वा तु चतुरः समुद्रान्रावणं हरिः ॥ विसर्जयामास ततस्तेन सख्यं चकार सः ॥ ५६ ॥ रावणः परमप्रीत एवं लोकान्महाबलः ॥ चकार स्ववशे राम बुभुजे स्वयमेव तान् ॥ ५७ ॥ एवं प्रभावो राजेंद्र दशग्रीवः सहेंद्रजित् ॥ त्वया विनिहतः संख्ये रावणो लोकरावणः ॥ ५८ ॥ मेघनादश्च निहतो लक्ष्मणेन महात्मना ॥ कुंभकर्णश्च निहतस्त्वया पर्वतसन्निभः ॥ ५९ ॥ भवान्नारायणः साक्षाज्जगतामादिरच्युतः ॥ त्वत्स्वरूपमिदं सर्वं जगत्स्थावरजंगमं ॥ ६० ॥ त्वन्नाभिकमलोत्पन्नो ब्रह्मा लोकपितामहः ॥ अग्निस्ते मुखतो जातो वाचा सह रघूत्तम ॥ ६१ ॥

ननगरं ॥ ५४

बलं हैहयप्रीतिरूपं बलं हरिपुंगवं वालिनं तद्धनगतस्य विपरीतं तत एवाभिष्टलाभ इत्याहतेनैव कक्षेणेत्यादि इति विषममत्रालंकारः ॥ ५५ सरावणः ॥ ५६ ॥ ५७ ॥ ५८ ॥ अत्र रावणावधं केंधद्वधकतया रामद्रष्टं इद

८ त्

राम०
८

टि०उ०स०१ प०

एतत्तवनाश्चार्यायेत्याह ॥ भवानिति ॥ आदिहूत उत्पत्ति कर्त्तार्जगतो भगवत्स्वरूपत्वमेवाह त्वन्नाभीति अग्नि
स्ते इति मुखादग्निरजायतेति श्रुतेश्च ॥ ६० ॥ ६१ ॥ बाहुभ्यामित्याद्यपि श्रुतिसिद्धमिति तद्विदां स्पष्टमेव ॥ ६२ ॥ प्राणः
प्राणवायुः जंघोरू(औ)रुजघनादिति समाहरद्वंद्वः ॥ ६३ ॥ वालखिल्याऋषिविशेषाः ॥ ६४ ॥ ६५ ॥ विश्वरूपः विराडित्य

बाहुभ्यां लोकपालौ द्यौश्चक्षुर्भ्यां चंद्रभास्करौ ॥ दिशश्च विदिशश्चैव कर्णाभ्यां ते समुत्थिताः
६२ ॥ प्राणात्प्राणः समुत्पन्नश्चाश्विनौ देवसत्तमौ जंघाजानूरुजघनाद्भुवर्लोकादयो भव
न् ॥ ६३ ॥ कुक्षिदेशात्समुत्पन्नाश्चत्वारः सागरा हरे ॥ स्तनाभ्यामिंद्रवरुणौ वालखिल्याश्च
रेतसः ॥ ६४ ॥ मेढ्राद्यमो गुदान्मृत्युर्मन्योरुद्रस्त्रिलोचनः ॥ अस्थिभ्यः पर्वता जाताः केशेभ्यो मे
घसंहतिः ॥ ६५ ॥ ओषध्यस्तव रोमेभ्यो नखेभ्यश्च खरादयः ॥ त्वं विश्वरूपः पुरुषो मायाश
क्तिसमन्वितः ॥ ६६ ॥ नानारूप इवाभासि गुणव्यतिकरे सति ॥ त्वामाश्रित्यैव विबुधाः
पिबंत्यमृतमध्वरे ॥ ६७ ॥ त्वयासृष्टमिदं सर्वं विश्वं स्थावरजंगमं ॥ त्वामाश्रित्यैव जीवं
ति सर्वे स्थावरजंगमाः ॥ ६८ ॥

॥ र्घः मायाया गुणानां सत्वादीनां व्यतिकरे सति ॥ आधिक्यन्यूनता
भ्यां परस्परसंश्लेषे सति नानारूपो ब्रह्मविष्णुरुद्रादिरूपो भासि ॥ ६६ ॥ अग्निरूपं त्वामाश्रित्यैव अमृतं ह
विरध्वरे देवाः पिबंति ॥ ६७ ॥ त्वमेव सृष्टिस्थितिकर्त्तेत्याह त्वयेति ॥ ६८ ॥ श्रीगोपीजनवल्लभाय नमः॥

व्यवहारे तत्कालेपि अखिलं वस्तु त्वद्युक्तमेव सत्त्वेन भातत्वे मनसः ॥ त्वमनसः व्यवहारः संज्ञाभाने च सर्वत्र त्व
दीयं एवेति भावः तदेव दृष्टांतेनोपपादयति सर्पिर्यथाखिलं पयो व्याप्य तिष्ठति तथा त्वमखिलं व्याप्य ति
ष्ठसीति सर्वत्र सदिति भासते इति च व्यवहारः ॥ तमेव भांतमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतेः
तदेवाह त्वद्भासेति ईदृशस्त्वं न सर्ववेद्य ॥ इत्याह सर्वगमिति ॥ ७० ॥ ज्ञानचक्षुषो प्यात्मन्येव त्वां पश्यतीत्या
योगिन इति न तु स्वस्मादेहे नेत्यर्थः ॥ एतेन सर्वत्र चैतन्यभूतत्वमेवेति सूचितं विचिन्वंति पश्यंति ॥ ७१ ॥ यथा

त्वद्युक्तमखिलं वस्तु व्यवहारेपि राघव ॥ क्षीरमध्यगतं सर्पिर्यथा व्याप्याखिलं पयः ॥ ६९
त्वद्भासा भासते र्कादि न त्वं तेनावभाससे ॥ सर्वगं नित्यमेकं त्वां ज्ञानचक्षुर्विलोकयेत् ॥ ७० ॥ नाज्ञा
नचक्षुस्त्वां पश्येदंधदृक् भास्करं यथा ॥ योगीनस्त्वां विचिन्वंति स्वदेहे परमेश्वरं ॥ ७१ ॥ अतन्नि
रसनमुखैर्वेदशीर्षैरहर्निशं ॥ त्वत्पादभक्तिलेशेन गृहीता यदि योगिनः ॥ ७२ ॥ श्रीरामायनमः

दर्शने कारणमाह ॥ अतदिति ॥ अतद्रूपं जडं तन्निरसनमुखैर्नो स्त्री न पुमानित्यादिरूपैर्वेदशीर्षैरुपनि
षद्भागैः पश्यंति वस्तुतो निर्धर्मकत्वात्केनापि रूपेण वक्तुमशक्यत्वात् निषेधमुखेनैव श्रुतयो ब्रह्म
प्रतिपादयंतीति भावः तदपि तेषां ज्ञाने त्वद्भक्तिं विनोपनिषन्मात्रेणेत्याह त्वत्पादेति ॥ अन्यथा नेति भा
वः ॥ ७२ ॥ श्री ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥ ॥ श्री ॥

विचिन्वंतः उपनिषत्सु विचारयंतः॥ अन्यथा न केनचिद्धर्मेण धर्मवर्तं न पश्यंतीत्यर्थः ७३ भजतां भक्तानां अभिन्नत्वाभिन्नत्वेन बुद्धिविषयं॥ ७४॥ इति श्रीमदध्यात्मरामायणस्य टीकायां श्रीरामवर्मेण० छतौ सेतौ

विचिन्वंतो हि पश्यंति चिन्मात्रं त्वां न चान्यथा॥ मया प्रल्पितं किंचित्सर्वज्ञस्य तवाग्रतः॥ ७३॥ क्षंतुमर्हसि देवेश तवानुग्रहभागहं॥ ७३॥ दिग्देशकालपरिहीनमनन्यमेकं चिन्मात्रमक्षरमरं जं चलनादिहीनं सर्वज्ञमीश्वरमनंतगुणं व्युदस्तमायं भजे रघुपतिं भजतामभिन्नं॥ ७५॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे द्वितीयः सर्गः॥ २॥ श्रीराम उवाच॥ वालिसुग्रीवयोर्जन्म श्रोतुमिच्छामि तत्वतः॥ रवींद्रौ वानराकारौ जज्ञाते इति नः श्रुतं॥ १॥ अगस्त्य उवाच॥ मेरोः स्वर्णमयस्याद्रेर्मध्यशृंगे मणिप्रभे॥ तस्मिन्सभास्ते विस्तीर्णा ब्रह्मणः शतयोजना॥ २॥ तस्यां चतुर्मुखः साक्षात्कदाचिद्योगमास्थितः॥ नेत्राभ्यां पतितं दिव्यमानंदसलिलं बहु॥ ३॥ तद्गृहीत्वा करे ब्रह्मा ध्यात्वा किंचित्तदत्यजत्॥ भूमौ पतितमात्रेण तस्माज्जातो महाकपिः॥ ४॥ तमाह द्रुहिणो वत्स किंचित्कालं वसात्र मे॥ समीपे सर्वशोभाढ्ये ततः श्रेयो भविष्यति॥ ५॥

१ उत्तरकांडे द्वितीयः सर्गः॥ २॥ वालीति रवींद्राविति॥ आत्मा वै पुत्रनामासीति श्रुतेस्तयोरेव वानराकारत्वमुक्तं॥ १॥ सभा आस्ते इति छेदः॥ २॥ योगं ध्याने॥ ३॥ किंचित् ध्यात्वा तदत्यजत् भूमौ पतितमात्रेण तेन सलिलेन सार्ध्यं प्राप्तमिति शेषः

ब्रह्मणेति एवमुक्त इत्यन्वयः ऋक्षाधिपः ॥६॥ उद्यत उद्यमवान् फलमूलार्थं तस्मा भार्यमद्रौ पर्यटनवापीम
पश्यत् ॥७॥ छायामायं स्वछायारूपं प्रतिकपिं स्वविरोधिकपिं ॥८॥ आत्मानं सुंदरीरामा तद्रूपं स्त्रीरूपमपश्य

इत्युक्तोन्ववसत्तत्र ब्रह्मणा वानरोत्तमः ॥ एवं बहुतिथे काले गते ऋक्षाधिपः सुधीः ॥६॥
कदाचित्पर्यटन्नद्रौ फलमूलार्थमुद्यतः ॥ अपश्यद्दिव्यसलिलां वापीं मणिशिलाचितां ॥७॥
पानीयं पातुमागच्छत्तत्र छायामयं कपिं ॥ दृष्ट्वा प्रतिकपिं क्रोधी निपपात जलांतरे ॥८॥
तत्र दृष्ट्वा हरिः शीघ्रं पुनरुत्प्लुत्य वानरः ॥ अपश्यत्सुंदरीं रामामात्मानं विस्मयं गतः ॥९॥
ततः सुरेशो देवेशं पूजयित्वा चतुर्मुखं ॥ गच्छन्मध्याह्नसमये दृष्ट्वा नारीं मनोरमां ॥
॥१०॥ कंदर्पशरविद्धांगस्त्यक्तवान्वीर्यमुत्तमं ॥ तामप्राप्यैव तद्बीजं वालदेशे पतद्भुवि ॥
॥११॥ वाली समभवत्तत्र शक्रतुल्यपराक्रमः ॥ तस्य दत्वा सुरेशानः स्वर्णमालां दिवं
गतः ॥१२॥ भानुरप्यागतस्तत्र तदानीमेव भामिनीं दृष्ट्वा कामवशो भूत्वा ग्रीवादेशे स
जन्महत् ॥१३॥ बीजं तस्यास्ततः सद्यो महाकायोभवद्धरिः ॥ तस्य दत्वा हनूमंतं स
हायार्थं गतो रविः ॥१४॥

॥८॥ ॥९॥ सुरेशः इंद्रश्चतुर्मुखं पूजयित्वा पुरीं गच्छन् तां नारीं दृष्ट्वा ताम
प्राप्यैव तया सह मिलनं विनैव वीर्यं त्यक्तवान् ॥१०॥११॥१२॥ तस्याग्रीवादेशे महद्बीजमसृजत् त्यक्तवान्
॥१४॥

पूर्ववत् पुंरूपमित्यर्थः ॥१५॥१६॥ समाश्वास्य भाविनो दुर्वारत्वान्ममस्त्रीरूपताकथमित्यादिखेदो मास्त्विसा
श्वास्येत्यर्थः देवता दूतदेव दूत मित्यर्थः ॥१७॥१८॥ सौभाग्यवलितांत मुक्तां ॥१९॥ वशेभविष्यंति अनुगाश्च

पुत्रद्वयं समादाय गत्वा सा निद्रिता क्वचित् ॥ प्रभाते पश्यदात्मानं पूर्वविद्वानराकृतिं ॥१५॥
फलमूलादिभिः सार्द्धं पुत्राभ्यां सहितः कपिः ॥ नत्वा चतुर्मुखस्याग्रे ऋक्षराजः स्थितः सुधीः
॥१६॥ ततोऽब्रवीत्समाश्वास्य बहुशः कपिकुंजरं ॥ तत्रैकं देवता दूतमाहूयामरसंनिभं ॥१७॥
गच्छ दूत मया दिष्टो गृहीत्वा वानरोत्तमं ॥ किष्किंधादिव्यनगरी निर्मितां विश्वकर्मणा ॥१८॥
सर्वसौभाग्यवलितां देवैरपि दुरासदां ॥ तस्यां सिंहासने वीरं राजानमभिषेचय ॥१९॥ स
प्तद्वीपगता ये ये वानराः संति दुर्जयाः ॥ पर्वते ऋक्षराजस्य भविष्यंति वशानुगाः ॥२०॥ यदा
नारायणः साक्षाद्रामो भूत्वा सनातनः ॥ भूभारासुरनाशाय संभविष्यति भूतले ॥२१॥ तदा स
र्वैः सहायार्थे तस्य गच्छंतु वानराः ॥ इत्युक्तो ब्रह्मणा दूतो देवानां सुमहामतिः ॥२२॥ पथात्तेन
स्तथा चक्रे ब्रह्मणा तेह रीश्वरं ॥ देव दूतस्ततो गत्वा ब्रह्मणे तन्निवेदयत् ॥२३॥ तदा दिवान
राणां सा किष्किंधाभून्नृपाश्रयः ॥ सर्वैश्वरस्त्वमेवासीरिदानीं ब्रह्मणार्पितः ॥२४॥ ॥

भविष्यति ॥२०॥२१॥२२॥ ततस्तस्य किंष्किधाराज्यादिदानं ॥२३॥ तदादितत्प्रभृति हेन्नपवानराणां सा किष्किं

धाश्रयो भूत्वा लंकेशहाने बलवत्सुग्रीवः॥ स
न सर्वैर्वृतः ॥२४॥

लीलानन्ददेहिना लीलागृहीतमनुष्यदेहेन ॥ अयं पराक्रमस्तव नाश्चर्यमित्याह ॥ सर्वभूतेति यस्त्वामेवं वेत्ति सो
पि स्वेच्छयास्य सृष्टिसंहारसमर्थो भवति चेत्साक्षात्तव किं वाच्यमिति भावः ॥२५॥ नन्वीदृशस्य नाश्चर्यमस्य किं वर्ण
नेन तत्राह ॥ तथापीति सर्वलोकपापनाशायात्मनस्तेषां सुखाय चानाश्चर्यमपि आश्चर्यवत् इत्वा वर्ण्यते

भूमेर्भारो हृतः कृत्स्नस्त्वया लीलानन्ददेहिना ॥ सर्वभूतान्तरस्थस्य नित्यमुक्तचिदात्मनः ॥२५॥
अखण्डानन्दरूपस्य क्रियानेषु पराक्रमः ॥ तथापि वर्ण्यते सद्भिर्लीलामानुषरूपिणः ॥२६॥
यशस्ते सर्वलोकानां पापघ्नं सुखाय च ॥ य इदं कीर्तयेन्मर्त्यो वालिसुग्रीवयोर्महत् ॥२७॥
जन्म त्वदाश्रयत्वात्स मुच्यते सर्वपातकैः ॥ अथान्यां संप्रवक्ष्यामि कथां रामत्वदाश्रयां ॥
२८ सीता हृता यदर्थं सा रावणेन दुरात्मना ॥ पुरा कृतयुगे राम प्रजापतिसुतं विभुं ॥२९॥ सनत्
कुमारमेकान्ते समासीनं दशाननः ॥ विनयावनतो भूत्वा ह्यभिवाद्येदमब्रवीत् ॥३०॥ कोन्व
स्मिन्प्रवरो लोके देवानां बलवत्तरः ॥ देवाश्च यं समाश्रित्य युद्धे शत्रुं जयंति हि ॥३१॥ कं य
जन्ति द्विजा नित्यं कं ध्यायन्ति च योगिनः ॥ एतन्मे शंस भगवन्नूम श्नं प्रश्नविदांवर ॥३२॥

इत्यर्थः ॥२६॥२७॥ तज्जन्म न त्वया अवयवत्वात्कुम्भकारार्थत्वात् यस्तयोर्जन्म कथयेत्स पातकैर्मुच्यते
२८ ॥ यदर्थं सीता हृता तां त्वदाश्रयां त्वद्विषयां कथां वक्ष्यामि प्रजापतेः सुतमानसं सुतं ॥२९॥३०॥ अस्मिन्लो
के प्रवरः । श्रेष्ठः विवक्षितं ब्रह्ममेवाह देवानामित्यादि बलवत्तरत्वमेव प्रकटयति देवाश्चेति ॥३१॥३२॥

तस्य एव एतस्य हृदिस्थं ताइ शान्मे मरणं भवत्विती च्छारूपं ॥३३॥ यः सुरासुरैर्नुतः स हरिर्नारायणादिपदवाच्यः
सर्वः ॥३४॥ अथ तद्व्रक्षणमाह ॥ यन्नाभीति ॥ अनेन ब्रह्मसहित जगत्स्रष्टत्व रूपं तद्व्रक्षणमुक्तं ॥३५॥ अनुतुज

ज्ञात्वा तस्य हृदिस्थं यत्तद्घोषेणायोगदृक् ॥ दशाननमुवाचेदं शृणु वक्ष्यामि पुत्रक ॥३३॥ भर्त्ता
योजगतां नित्यं यस्य जन्मादिकं न हि ॥ सुरासुरैर्नुतो नित्यं स हरिर्नारायणोव्ययः ॥३४॥ यन्नाभिपंक
जाज्जातो ब्रह्मा विश्वसृजां पतिः ॥ सृष्टं येनैव सकलं जगत्स्थावरजंगमं ॥३५॥ तं समाश्रित्य वि
बुधा जयंति समरे रिपून् ॥ योगिनो ध्यानयोगेन तमेवानुजयंति हि ॥३६॥ महर्षेर्वचनं श्रुत्वा
भूयस्तु वाच दशाननः ॥ दैत्यदानवरक्षांसि विष्णुना निहतानि च ॥३७॥ कां वा गतिं प्रपद्यंते प्रस्तते मु
निपुंगव ॥ तमुवाच मुनिः श्रेष्ठो रावणं राक्षसाधिपं ॥३८॥ देवतैर्निहतानि त्वं गत्वा स्वर्गमनुत्तमं
भोगक्षये पुनस्तस्मात् भ्रष्टा भूमौ भवंति ते ॥ पूर्वार्जितैः पुण्यपापैस्त्रियंते चो भवंति च ॥ विष्णुना
ये हतास्ते तु प्राप्नुवंति हरेर्गतिं ॥४०॥ श्रुत्वा मुनिमुखात्सर्वं रावणो हृष्टमानसः ॥ योत्स्येहं हरिणा
सार्धमिति चिंतापरो भवत् ॥४१॥ मनः स्थितं परिज्ञात्वा रावणस्य महामुनिः ॥ उवाच वत्स ते भी
ष्टं भविष्यति न संशयः ॥४२॥

यंति ध्यायंति ॥३६॥३७॥ कां चेति वा शब्दो वाक्यालंकारे ॥३८॥३९॥ हरेर्गतिं मुक्तिं सा च क्रमेण हिरण्यगर्भेण सहे
तिबोध्यं ॥४१॥ एवमुक्तौ घुरपि रावणो भगवन्मायावशात्तमोगुणप्रधानत्वाद्व भगवद्द्वेषेणैव मुक्तिं प्रार्थय

सुखीभवेत्तस्य तत इत्यादिः ॥ ततो मरणलाभेन सुखित्वं ॥४३॥ स्थावरेषु नदीषु च सर्वास्त इति शेषः ॥४४॥ इ-
दमुपलक्षणं तदाह ॥ ओंकार इति प्रणवरूपत्वेन सर्ववाङ्मयव्यापित्वमुक्तं ओंकार एवेदं सर्वा वागिति श्रुतेः तदेवा-
ह सत्यं वाक्यं सावित्री गायत्री च सत्य इत्यनेन अर्थोपि सर्वस्तद्रूप एवेत्याह पृथिवी चेति इदमुपलक्षणं त-

केचित्कालं प्रतीक्षस्व सुखी भव दशानन ॥ एवमुक्त्वा महाबाहो मुनिः पुनरुवाच तं ॥४३॥
तस्य स्वरूपं वक्ष्यामि ह्यरूपस्यापि मायिनः ॥ स्थावरेषु च सर्वेषु नदेषु च नदीषु च ॥४४॥
ओंकारश्चैव सत्यं च सावित्री पृथिवी च सः ॥ समस्तजगदाधारः शेषरूपधरो हि सः ॥४५॥
सर्वे देवाः समुद्राश्च कालः सूर्यश्च चंद्रमाः ॥ सूर्योदयो दिवारात्री यमश्चैव तथानिलः ॥४६॥
अग्निरिंद्रस्तथा मृत्युः पर्जन्यो वसवस्तथा ॥ ब्रह्मा रुद्रादयश्चैव ये चान्ये देवदानवाः ॥४७॥
विद्योतति ज्वलत्येषः पाति चात्तीति विश्वकृत् ॥ क्रीडां करोत्यव्ययात्मा सोयं विष्णुः सनात-
नः ॥४८॥ तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरं ॥ नीलोत्पलदलश्यामो विद्युद्वर्णांबरावृ-

दाह समस्तेति ॥४५॥४६॥ शेषा देवा दानवाः ताः सर्वे तद्रूपा एवेति विराड्रूपमुक्तं ॥४७॥ सूर्यादौ प्रकाशोग्नेर्ज्वल-
नं रक्षणसंहारौ च तदधीना एवेत्याह विद्योततीति तत्सर्वं मयत्नेनैवेत्याह क्रीडां करोतीति क्रीडामिव करोतीत्य-
र्थः न तु कश्चित्श्रमस्तस्येति भावः ॥४८॥ उक्तमेवार्थं सामान्येनोपसंहरति तेनेति अथ तत् ध्यानासक्तं मति अन्य

यमाह॥ नीलोत्पलेति विद्युद्वर्णांवरं पीतांवरं जांवूनदप्रख्यां तं तत्सदृशकांतिं देवीं पश्यन् स्वदर्शनेन स्वशक्तिव्यापाराद्दै प्रवर्त्तयन् आलिंग्य तीष्ठतीत्यनेनतस्यास्तस्तेनास्यंतं भेद इति दर्शितं शक्तिमतोस्तादात्म्यस्यैवशास्त्रसिद्धांतत्वा
त्॥४९॥५०॥तादृशोपि अतः प्रसादं विना द्रष्टुमशक्य इत्याह॥ द्रष्टुमिति॥५१॥तद्दर्शनेन भक्तिरेवासाधारण उपाय

शुद्धजांवूनदप्रख्यां श्रियं वामांकसंस्थितां॥ सदानपायिनीं देवीं पश्यन्नालिंग्य तिष्ठति॥५०॥ द्रष्टुं न शक्य
ते कैश्चिद्देवदानवपन्नगैः॥ यस्य प्रसादं कुरुते स चैनं द्रष्टुमर्हति॥५१॥ न च यज्ञतपोभिर्वा न दानाध्यय
नादिभिः॥ शक्यते भगवान् द्रष्टुमुपायैरितरैरपि॥५२॥ तद्भक्तैस्तद्गतप्राणैस्तच्चित्तैर्धूतकल्मषैः॥ शक्य
ते भगवान् विष्णुर्वेदांतामलदृष्टिभिः॥५३॥ अथवा द्रष्टुमिच्छा ते शृणु त्वं परमेश्वरं॥ त्रेतायुगे स देवेशो भ
विता नृपविग्रहः॥५४॥ हितार्थं देवमर्त्यानामिक्ष्वाकूणां कुले हरिः॥ रामो दाशरथिर्भूत्वा महासत्वपरा
क्रमः॥५५॥ पितुर्नियोगात्सभ्रात्रा भार्यया दंडके वने॥ विचरिष्यति धर्मात्मा जगन्माता स्वमायया॥५६॥ एवं ते सर्वमाख्यातं मया राजवरान् विस्तरात्॥ भजस्व भक्तिभावेन तदा रामं श्रियायुतं॥५७॥ एवं
श्रुत्वासुराध्यक्षो ध्यात्वा किंचिद्विचार्य च॥ त्वया सह विरोधेषु मुमुदे रावणो महान्॥५८॥ युद्धा
र्थी सर्वतो लोकान् पर्यटन्समवस्थितः॥ एतदर्थं महाराज रावणोतीवबुद्धिमान्॥५९॥ ॥७॥

इत्याह द्रष्टुमिति॥५१॥ तद्दर्शनेन भक्तिरेवासाधारण उपाय इत्याह न चेति॥५२॥ तद्भक्तैरिति च शक्यते द्रष्टुमिति
शेषः॥५३॥ अथवा द्रष्टुमिच्छा एतैरुपायैर्विना पीति शेषः नृपविग्रहः गृहीतराजशरीरः॥५४॥ हितार्थमित्यस्य
लब्धार्थमिति हृत्स्थः शेषः महासत्वपराक्रमः महांतौ बलपराक्रमौ यस्य सः॥५५॥ जगन्मातृत्वं जगत्कारणत्वया

अ॰उ॰
१३

६॰ ॥ इति श्रीमदध्यात्मरामायणे स्पटीकायां श्रीरामवर्मणः कृतौ सेतौ उत्तरकांडे तृतीयः सर्गः ॥ ३ ॥ नारदोपि सर्वं तो
वत्सवं तं त्वां त्वत्सामीप्यं प्राप्तानेव चाहेत्याह एक देति ॥ १ ॥ ज्ञातासीति तत्र ॥ २ ॥ ३ ॥ ४ ॥ मंत्रिभिः सह पुष्पकेन श्वेतद्वी

हृतवान् जानकीं देवीं त्वया त्मवधकांक्षया ॥ ५९ ॥ इमां कथां यः शृणुयात्पठेद्वा संश्रावयेद्वा श्रव
णार्थिनां सदा ॥ आयुष्यमारोग्यमनंतसौख्यं प्राप्नोति लाभं धनमक्षयं च ॥ ६० ॥ इति श्रीमदध्यात्मरा
मायणे उमामहेश्वरसंवादे उत्तरकांडे तृतीयः सर्गः ॥ ३ ॥ एकदा ब्रह्मणो लोकादायांतं नारदं मुनिं ॥ प
र्यटन् रावणो लोकान् दृष्ट्वा नत्वाब्रवीद्वचः ॥ १ ॥ भगवन् ब्रूहि मे योद्धुं कुत्र संति महाबलाः ॥ योद्धुमिच्छा
मि बलिभिस्त्वं ज्ञातासि जगत्त्रयं ॥ २ ॥ मुनिर्ध्यात्वाह सुचिरं श्वेतद्वीपनिवासिनः ॥ महाबला महाकाया
स्तत्र याहि महामते ॥ ३ ॥ विष्णुपूजारता ये वै विष्णुना निहताश्च ये ॥ त एव तत्र संजातास्त्वजेयाश्च सुरासुरैः
४ ॥ श्रुत्वा तद्रावणो वेगान्मंत्रिभिः पुष्पकेण तान् ॥ योद्धुकामः समागच्छश्वेतद्वीपसमीपतः ॥ ५ ॥ तत्प्र
भाहततेजस्कं पुष्पकं नाचलत्ततः ॥ त्यक्त्वा विमानं प्रययौ मंत्रिणश्च दशाननः ॥ ६ ॥ प्रविशन्नेव
तद्वीपं धृतो हस्तेन योषिता ॥ दृष्टश्च त्वं कुतः कोसि प्रेषितः केन वा वद ॥ ७ ॥

पस्य मा पतः समागत्य स्थितः ॥ ५ ॥ तद्वीपप्रभया हततेजस्कं प्रतिहतगतिकं मंत्रिणश्च प्रययुः प्रस्नामिति शेषः
६ ॥ योषिता दासीरूपया कयाचित् ॥ ७ ॥ ॥ ॥ ॥ ॥ ॥

ए॰म॰
१३

६ये

८॥ विष्णुना हतः सर्वपापो वैकुंठं यामि यास्यामीति निश्चितः निश्चयवानसन् ॥९॥१०॥ स्वकबंधं स्वीयं बधमित्यर्थः ॥११॥
एवं कथामुक्त्वा स्वाश्रमं जिगमिषुरगस्त्यं भगवंतं स्तौति रामेति सकलज्ञानवत्वे हेतुः विज्ञानदृक् विज्ञानं स्वस्वरूप
मेव दृक् ज्ञानकारणं यस्य ज्ञाने इतरकारणानपेक्ष इति यावत् अत एव भूतमतीतं भव्यं भाविइदं वर्त्तमानं एवं

इत्युक्तो लीलया स्त्रीभिर्हसंतीभिः पुनः पुनः ॥ हस्ताद्धस्तादिनिर्मुक्तस्तासां स्त्रीणां दशा
ननः ॥८॥ आश्चर्यमतुलं लब्ध्वा चिंतयामास दुर्मतिः ॥ विष्णुनाहि हतो यामि वैकुंठमिति नि
श्चितः ॥९॥ मयि विष्णुर्यथा कुप्येत्तथा कार्यं करोम्यहं ॥ इ तिनिश्चित्य वैदेहीं जहार विपि
नेश्वरः ॥१०॥ जानन्नेव परात्मानं स जहारावनीसुतां ॥ मा त्वत्सालं मामासुलतत्तः कौक्ष
न्वधं स्वकं ॥११॥ राम त्वं परमेश्वरोसि सकलं जानासि विज्ञानदृक् भूतं भव्यमिदं त्रिकाले
कलनासाक्षी विकल्पोज्झितः ॥ भक्तानामनुवर्त्तनाय सकलां कुर्वन्क्रियां संहतिं त्वाश्चर्यवन्म
नुजाकृतिर्मुनिवचोभासीशलोकार्चितः ॥१२॥ स्तुत्वैवं राघवं तेन पूजितः कुंभसंभवः ॥ स्वाश्रमं
मुनिभिः सार्धं प्रययौ हृष्टमानसः ॥१३॥
त्रिषु कालेषु या कलना तत्तत्काले वैशिष्ट्येन तस्य साक्षाद्द्रष्टा विकल्पोज्झितः ॥ स्यक्तसंशय इत्यर्थः भक्ताना
मनुवर्त्तनाय स्वचरितकीर्त्तनादिना तेषां पापक्षयाय सकलक्रियासंहतिं कुर्वन् मनुजाकृतिर्नतु वस्तुतो मनु
ष्य इत्यर्थः ईशलोकैरिंद्रादिभिरर्चितस्त्वं सन्नीनामस्माकं वचः आश्चर्यवन्नासि शोभसे ॥१२॥ रामेण पूजितो

गपर्यं राघवं सकला स्वाश्रमं ययौ ॥१३॥

अ० उ०
१४

संसारीवनतुवस्कृतस्तथा १४ अनासक्तोपि आसक्तवद्विषयान्भुभुजे सद्भिः साधुभिः॥१५॥ततः भवदाज्ञया
कुबेरसमीपगमनानंतरं कुबेरेण त्वां प्रति प्रेषित मितिमाह॥१६॥अथ कुबेरवच आह जितमिति॥१७॥याव
न्न छेदिति यारेपि यदागच्छेदित्येवार्थः मांयाहि मांप्रत्यागच्छेत्यर्थः॥१८॥तदा आगच्छेति छेदः आगमनोत्त

रामस्तु सीतया सार्धं भ्रातृभिः सह मंत्रिभिः॥ संसारी वर्तमानाद्योरममाणो वसुन्धरे॥१४॥अ
नासक्तोपि विषयान्बुभुजे प्रियया सह॥ हनुमत्प्रमुखैः सद्भिर्वानरैः परिवेष्टितः॥१५॥पु
ष्पकं चागमत्कामं मे कदापूर्ववत्प्रभुं॥ प्राह देव कुबेरेण प्रेषितं त्वामहं ततः॥१६॥जितं त्वं
रावणेनादौ पश्चाद्रामेण निर्जितं॥अतस्त्वं राघवं नित्यं वह यावद्वसेद्भुवि॥१७॥यदा गच्छे
द्युश्रेष्ठो वैकुंठं याहि मां तदा॥तच्छ्रुत्वा राघवः प्राह पुष्पकं सूर्यसंनिभं॥१८॥यदा स्मरामि
भद्रं ते तदागच्छ ममांतिकं॥तिष्ठांतर्धिमसर्वत्र गच्छेरानीममाज्ञया॥१९॥इत्युक्त्वा रामचंद्रो
पि पौरकार्याणि सर्वशः॥भ्रातृभिर्मंत्रिभिः सार्धं यथान्यायं चकार सः॥२०॥राघवे शासति
भुवं लोकनाथे रमापतौ॥वसुधा सस्यसंपन्ना फलवंतश्च भूरुहाः॥२१॥जना धर्मपराः
सर्वे पतिभक्तिरताः स्त्रियः॥नापश्यत्पुत्रमरणं कश्चिद्राजनि राघवे॥२२॥
॥रं आत्मानमंतर्धाय
तिष्ठ यथा सर्वेर्लोकैर्मां देवत्वेन न जानीयादित्यर्थमेव मुक्तिः॥१९॥२०॥रामे सति शिक्षयति सती पाल्यतीति

राम०
१४

ततः कदाचित्स्त्रीप्रियांसम्प्रग्लक्षणां वर्त्ततेनवेति द्रष्टुं पुष्पकं सम्प्लुत्य तत्रारुह्य ष्टप्रियांसंचारं कुर्वन्नानेकान्यमानुषाणि कार्याणि चकारेत्याह समारुह्येति ॥२३॥ तेषां मध्ये किंचित्कर्माह ब्राह्मणस्येति अकालतः अकाले सार्वविभक्ति

समारुह्य विमानाग्र्यं राघवः सीतया सह ॥ वानरैर्भ्रातृभिः सार्धं संचचारावनिं प्रभुः ॥२३॥ अमानुषाणि कार्याणि चकार बहुशो भुवि ॥ ब्राह्मणस्य सुतं दृष्ट्वा बालं मृतमकालतः ॥२४॥ शोचंतं ब्राह्मणं चापि ज्ञात्वा रामो महामतिः ॥ तपस्यंतं वने शूद्रं हत्वा ब्राह्मणबालकं ॥२५॥ जीवयामास शूद्रस्य ददौ स्वर्गमनुत्तमं ॥ लोकानामुपदेशार्थं परमात्मा रघूत्तमः ॥२६॥ कोटिशः स्थापयामास शिवलिंगानि सर्वशः ॥ सीतां च रमयामास सर्वभोगैरमानुषैः ॥२७॥ शशास रामो धर्मेण राज्यं परमधर्मवित् ॥ कथां संस्थापयामास सर्वलोकमलापहां ॥२८॥ दशवर्षसहस्राणि मायामानुषविग्रहः ॥ चकार राज्यं विधिवल्लोकवंद्यपदांबुजः ॥२९॥ एकपत्नीव्रतो रामो राजर्षिः सर्वदा शुचिः ॥ गृहमेधीयमखिलमाचरन् शिक्षयन्जनान् ॥३०॥ सीता प्रेम्णानुवृत्त्या च प्रश्रयेण दमेन च ॥ भर्तुर्मनोहरा साध्वी भावज्ञा सा ह्रियाभिया ॥३१॥

॥कस्तरुसि ॥२४॥ लोकानामुपदेशार्थं यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनाः ॥ स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते इति न्यायेन ॥२६॥२७॥ कथां सच्चरित्रविषयां ॥२८॥ २९॥ शिक्षयन्जनानिति भगवतो धर्माचरणं लोकशिक्षार्थमेवेति भावः ॥३०॥ प्रेम स्नेहस्तद्वस्या प्रीति ॥ अनुवृत्ति

रानुकूल्यं प्रश्रयस्तन्मतानुष्ठानं दम इंद्रियनिग्रहः भावज्ञा अभिप्रायज्ञा मनोहरा आसीदिति शेषः ॥३१॥

आक्रीडविपिनं पुष्पवाटिका ॥३२॥३३॥ रामस्य पदांबुजे कराभ्यां लालयंती राममाह ॥३४॥ चिदानंदज्ञानसुखस्वरूपः ॥ आदिमध्यांतहीनः आद्यंतयोरभावादेवमध्यस्याप्यभावः अशेषस्य जगतः कारणमाह ॥३५॥ हे देव देवाः इंद्रा

एकदाक्रीडविपिने सर्वभोगसमन्विते ॥ एकांते दिव्यभवने सुखासीनं रघूत्तमं ॥३२॥ नीलमाणिक्यसंकाशं दिव्याभरणभूषितं ॥ प्रसन्नवदनं शांतं विद्युत्पुंजनिभांबरं ॥३३॥ सीता कमलपत्राक्षी सर्वाभरणभूषिता ॥ राममाह कराभ्यां सा लालयंती पदांबुजे ॥३४॥ देवदेव जगन्नाथ परमात्मन्सनातन ॥ चिदानंदादिमध्यांतरहिताशेषकारण ॥३५॥ देवदेवाः समासाद्य मामेकांते ब्रुवन्वचः ॥ बहुशोर्थ्यमानास्ते वैकुंठगमनं प्रति ॥३६॥ त्वया समेतस्त्विच्छंत्यारामस्तिष्ठति भूतले ॥ विसृज्यास्मान्स्वकं धाम वैकुंठं च सनातनं ॥३७॥ आस्ते त्वयाजगद्धात्रि रामः कमललोचनः ॥ अगतो याहि वैकुंठं त्वं तथा चेद्रघूत्तमः ॥३८॥ आगमिष्यति वैकुंठं सनाथान्नः करिष्यति ॥ इति विज्ञापिताहं तैर्मया विज्ञापितो भवान् ॥३९॥ यद्युक्तं तत्कुरु श्रीघनाह माज्ञापये प्रभो ॥ सीताया स्तद्वचः श्रुत्वा रामो ध्यात्वाब्रवीत्तदा ॥४०॥

॥ घाः तेतव वैकुंठगमनं प्रति बहुशो मां प्रार्थयमाना वचो ब्रुवन् ॥३६॥ निर्विषचित्तः सविषयत्वसंपादकत्वेन चिच्छक्तिरूपया मायया विसृज्यास्मान्स्वकं सनातनं धाम वैकुंठं च हित्वा ॥३७॥ अतः प्रथमं त्वया गच्छत ततः स आगमिष्यत्येव शक्त्या विना शक्तिमतास्थातुमशक्यत्वात् ॥३८॥३९॥४०॥

लोकवादरूपं मिषं कल्पयित्वा ततो भीतः॥ अपर इव पृथक् जन इव त्वां त्यजामि सर्वस्यापि स्वकल्पनारूपत्वात्
इममपि जनं सिकल्पयिष्यामीत्याशयः॥४१॥ प्रसमार्य सीता नेदृशीति विश्वासार्थं॥४३॥४५॥ हास्यविषये मोढा

देविज्ञा नामि सकलं तत्रोपायं वदामि ते॥ कल्पयित्वा मिषं देवि लोकवादं त्वदाश्रयं॥४१॥ त्यजामि त्वां वने लोकवादाद्भीत इवापरः॥ भविष्यतः कुमारौ द्वौ वाल्मीके राश्रमांतिके॥४२॥ इदानीं दृश्यते गर्भः पुनरागत्य मे तिकं॥ लोकानां प्रत्ययार्थं त्वं कृत्वा पं शीथमादरात्॥४३॥ भूमेर्विवरमार्गेण वैकुंठं यास्यसि द्रुतं॥ पश्चादहं गमिष्यामि एष एव सुनिश्चयः॥४४॥ इत्युक्त्वा तां विसृज्याथ रामो ज्ञानैकलक्षणः॥ मंत्रिभिर्मंत्रतत्त्वज्ञैर्वृत्तमुख्यैश्च संवृतः॥४५॥ तत्रोपविष्टः श्रीरामः सुहृद्भिः पर्युपासत॥ हास्यप्रौढकथासु ज्ञा हासयंतः स्थिता हरिं॥४६॥ कथाप्रसंगात्स प्रच्छ रामो विजयनामकं॥ पौरजानपदा मे किं वदंतीह शुभाशुभं॥४७॥ सीतां वा मातरं वा मे भ्रातन्वा कैकयीमथ॥ नभेतव्यं त्वया ब्रूहि शापितोसि ममोपरि॥४८॥ इत्युक्तः प्राह विजयो देव सर्वे वदंतिते॥ कृतं सुदुष्करं सर्वं रामेण विहितात्मना॥४९॥ किंतु हत्वा दशग्रीवं सीतामाहृत्य राघवः॥ अमर्षं दृष्टतः कृत्वा स्ववेश्म प्रत्यपादयत्॥५०॥

॥श्वतेकथासुसुज्ञाः॥४६॥ इह तेन ज्ञन्म विषये॥४८
सीतामित्यादेः॥ प्रतीतिशेषः तत्तद्विषये किं शुभाशुभं वदंतीत्यर्थः शापितोसि स्वपयपूर्वं दृच्छामीत्यर्थः॥४८॥

॥५६॥ ले॥ लवकुशकथापात्रदेहपतगर्ह प्रविवेकितवा ॥५०॥

याद्दुष्टेन रावणेन हृता वलान्नीता सापि गृहं प्रवेशितेति अकृत्यमेतदिति शेषः ॥५१॥ किंचैवं सति अस्मदादीनामपि
योषितां दुष्कर्ममर्षणं तद्योग्य सहनयोग्यं भवेत् भविष्यतीत्यर्थः ॥ तदेव स्पष्टयति ॥ यादृगिति नियंतं नियमेन प्रजा
स्तादृशा भवंति राजव्यवहारानुरूप व्यवहारा भवंतीत्यर्थः ॥५२॥५४॥ लोकापवादः कलंकः समानीय अंतःपुरं निष्का

कीदृशं हृदये तस्य सीतासंभोगजं सुखं ॥ या हृता विजनेऽरण्ये रावणेन दुरात्मना ॥५१॥ अस्माकमपि
दुष्कर्म योषितां मर्षणं भवेत् ॥ यादृग्भवति वै राजा तादृश्यो नियतं प्रजाः ॥५२॥ श्रुत्वा तद्व
चनं रामः स्वजनान्पर्यपृच्छत ॥ तेऽपि नत्वाब्रुवन्राममेवमेतन्न संशयः ॥५३॥ ततो विसृज्य सचिवान्
विजयं सुहृदस्तथा ॥ आहूय लक्ष्मणं रामो वचनं चेदमब्रवीत् ॥५४॥ लोकापवादस्तु महान्सीता
माश्रित्य मेऽभवत् ॥ सीतां प्रातः समानीय वाल्मीकेराश्रमांतिके ॥५५॥ त्यक्त्वा शीघ्रं रथेन त्वं पु
नरायाहि लक्ष्मण ॥ वक्ष्यसे यदि वा किंचित्तदा मां हतवानसि ॥५६॥ इत्युक्तो लक्ष्मणो भीत्या मा
तरुत्थाप्य जानकीं ॥ सुमंत्रेण रथे कृत्वा जगाम सह सा वनं ॥५७॥ वाल्मीकेराश्रमस्यांते त्यक्त्वा
सीतामुवाच सः ॥ लोकापवादभीत्या त्वां त्यक्तवान्राघवो वने ॥५८॥ दोषेण कश्चिन्नेमा तग
च्छाश्रमपदं मुनेः ॥ इत्युक्त्वा लक्ष्मणः शीघ्रं गतवान्रामसन्निधिं ॥५९॥

॥ इयपत्यक्त्वा शीघ्रं रथेन पुनरया
हीत्युक्ता सीताया अपि रथेनास्यापतं सूचितं न तु साक्षात्तयोक्तं तस्यां क्रोधातिशयं द्योतयितुमिव मां हतवा
नसि अत्रार्थे विपरीतोक्तौ मदधमयुमा पश्चित्स्व मित्यर्थः ॥५६॥ ५७॥५८॥५९॥

३ सेवां चक्रुः सदा तस्या विनयादिभिरादरात् ॥

अतिमुग्धवत् अत्यज्ञवत् शिष्यैः शिष्यमुखैः ॥ ८० ॥ मुनियोषिता मार्ययत् एषा सर्वथा रक्षणीयेति तासां हस्ते दत्तवान् ॥ ८० ॥ परात्मनः विष्णोः ॥ ८१ ॥ मुनियोषिता मार्ययत् ॥ एषा सर्वथा सेविता प्रिः मुनिभिः सेविते अप्रियं स्यमुनीनां सेविता प्रीयेनेति वा ॥ ८४ ॥ इति श्रीमदध्यात्मरामायणे उत्तरकांडे चतुर्थः सर्गः ॥ ४ ॥ अथ भगवान् शिवो रामलक्ष्मणसंवादमुखेन परतत्वमुपदेष्टुमाह ॥ ततइति जगतां यानि मंगलानि आनंदास्तेषां मुपजीव्यभू

सीतापि दुःखसंतप्ता विलल्लापातिमुग्धवत् ॥ शिष्यैः श्रुत्वा च वाल्मीकिः सीतां ज्ञात्वा स दिव्यदृक् ॥ ८० ॥ अर्घ्यादिभिः पूजयित्वा समाश्वास्य च जानकीं ॥ ज्ञात्वा भविष्यं सकलमार्पयन्मुनियोषितां ॥ ८१ ॥ तास्तां संपूजयंति स्म सीतां भक्त्या दिनेदिने ज्ञात्वा परात्मनो लक्ष्मीं मुनिवाक्येन योषितः ॥ ८२ ॥ रामोपि सीतारहितः परात्मा विज्ञानदृक्केवल आदिदेवः ॥ संत्यज्य भोगानखिलान्विरक्तो मुनिव्रतोऽभून्मुनिसेवितांघ्रिः ॥ ८३ ॥ इति मदध्यात्मरामा० उत्तरकांडे चतुर्थः सर्गः ॥ ४ ॥ ततो जगन्मंगलमंगलात्मना विधाय रामायणकीर्तिमुत्तमां ॥ चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्यैरभिसेवितं य

तं मंगलत्वं ब्रह्मानंदः ॥ स एव वा आत्मा स्वरूपं तेन एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेर्मंगलानां च मंगलमिति स्मृतेश्च किंच जगतां मंगलं कल्याणं यस्मात्तादृशकल्याणरूप आत्ममूर्तिस्तया उत्तमां श्रोत्रादीनां मोक्षदत्वेनासुत्तमां रामायणकीर्तिं वाल्मीक्यादिकृतनानाविधरामायणप्रवर्तिकां

रामा० ॥ ७४ ॥

अ०उ०
९७

धा द्विजां कीर्त्तिं विधाय स्थितोऽर। घूत्तमस्ततः। सीतापरित्यागानंतरं पूर्वैः स्ववंशजैराचरितं प्रजापालनस
त्कथाश्रवणादिकं केवलं न त्वहं वंशजैरेव चरितमिति न किंतु अन्यैरपि राजर्षिश्रेष्ठैर्यथाभिसेवितं तथा चचार
कृतवान् ॥१॥ उदारगुरुदेव बिभ्राः सल्लक्षणमहागुणवती यद्वा उदारा दानशीला बुद्धिर्यस्य तेन पुरात
नीः ॥ प्राचा नराज संबंधिनी शुभाः ॥ धर्माधर्मनिर्णयेऽप्रमत्तस्य स्वर्गो मंगलमिश्रित ब्राह्मण गोदानात्प्र
मत्तस्य नृगस्य राज्ञो द्विजस्य शापात् तिर्यक्त्वमाहतेनाज्ञानकृत ब्रह्मस्वापहारेण परमधार्मिकस्यापीद

सौमित्रिणा पृष्टउदारबुद्धिना रामः कथाः प्राह पुरातनीः शुभाः ॥ राज्ञः प्रमत्तस्य नृगस्य शाप
तो द्विजस्य तिर्यक्त्वमथाह राघवः ॥२॥ कदाचिदेकांतउपस्थितं प्रभुं रामं रमालालितपादपं
कजं ॥ सौमित्रिरासादितशुद्धभावनः प्रणम्य भक्त्या विनयान्वितोऽब्रवीत् ॥३॥ श्रीरामः॥

शीवस्येति सर्वथा ब्रह्मस्वविमुखता धर्म इति सूचितं ॥२॥ एकांते विजने च उपस्थितं प्राप्तं विनयान्वितः
सन् भक्त्या गुरुस्त्वमिति बुध्या प्रणम्य अनेन गुरूपसदनप्रकार उक्तः ॥ आसादितं शुद्धं भावनं भावना क
रणं मनः करणं येन सः शुद्धांतःकरण इति यावत् भगवदुक्त सत्कथाश्रवणेन शुद्धांतःकरण इत्य
र्थः ॥३॥ ॥० ॥०॥ ॥०॥ ०॥ ०॥ ॥०॥ ०॥ ०॥ ॥०॥ ०॥ ॥०॥ ०॥ ०॥ ॥०॥ ०॥ ॥०॥ ॥ ०॥ ०॥ ०॥

राम०
९७

हे महामते महती सर्वविषयामितिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोसि अनवच्छिन्नतत्स्वरूपोसि सर्वदेहिनामात्मासि जीवानां तत्प्रतिबिंबत्वात् ॥ अधीशोसि अंतर्यामित्वात् नियंतासि वा स्तव भेदाभावाच्च सर्वात्मतत्त्वं औपाधिकभेदाच्च नियंतृनियम्यभावो बोध्यः निराकृतीः असमदादिवत् स्वार्जितकर्माधीन शरीराकृति रहितः नन्वेवं सर्वैः कथमेवं न ज्ञायेत आह ज्ञानदृशां स्वयमेव प्रतीयसे ज्ञायते नेति ज्ञानं वेदांतवाक्यजातं देवदृक् दृशिनसाधनं येषां तेषामिति संबंधसामान्ये षष्ठी तेरिसर्ग्घः ॥ तादृशदृक्लाभश्च त्वाम्रत्तय धीन इत्याह

त्वं शुद्धबोधोसि हि सर्वदेहिनामात्मास्यधीशोसि निराकृतिः स्वयं ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृंगाहितसंगसंगिनां ॥४॥ अहं प्रपन्नोस्मि पदांबुजं प्रभो भवापवर्गं तव योगिभावितं ॥ यथांजसा ज्ञानमपारवारिधिं सुखं तरिष्यामि तथानुशाधि मां ॥५॥

पादेति त्वच्चरणकमलयोर्भृंगवदाहितः कृतः संगो येन तादृशांतःकरणसंगवतां त्वच्चरणकमलसंलग्नांतःकरणवतामित्यर्थः ॥४॥ अथ प्रार्थयते ॥ अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पदांबुजं प्रपन्नोस्मि शरणं प्राप्तोस्मि योगीभावितं योगिभिः संसारमुक्तये भावितं ॥ अनेन तस्य ॥ भवापवर्गत्वे सदाचारः प्रमाणमुक्तं प्रार्थनीयमाह ॥ अपारवारिधिरूपमज्ञानसंसारमूलकारणं यथा सुखमक्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षस्व अपारवारिधिमित्यनेन सपारश्चोसि द्रुसमुद्राद्यतिरेक उक्तः अ

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा। अथशब्दो वाक्यालंकारे तदाश्रवणाव्यवहितकाले ए
वप्रपन्नानां भक्तानामार्त्तिं संसारदुःखं हरतीति तादृशः प्रसन्नात्माऽमादिहीनाभक्तानुग्रहपरा च धीर्यस्य सः
क्षितिपालानां भूषणभूतो ज्ञानरूपतमसउपशांतये तदर्थे संधिरार्षः॥ श्रुतिभिः तमेव विदित्वातिमृत्यु
मेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्यतः प्रथमं माह॥
द॥ अथ तादृशज्ञानप्राप्तये क्रमेण बहिरंगांतरंगसाधनान्याह॥ आराविति स्ववर्णाश्रमेषु शास्त्रेण

श्रुत्वाथ सौमित्रिवचोखिलं तदा प्राह प्रपन्नार्त्तिहरः प्रसन्नधीः॥ विज्ञानमज्ञानतमोपशांतये
श्रुतिप्रपन्नं क्षितिपालभूषणः॥६॥ आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्ध
मानसः॥ समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥७॥ रामः रामः रामः॥

वर्णिता याः क्रिया नित्यनैमित्तिकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तांतः॥ तत्पूर्वमुपात्त
साधनः तदनुष्ठानपूर्वकमेव उपात्तानि संपादितानि साधनानि शमदमादीनि येन तादृशः॥ अनेन कर्म
णां बहिरंगत्वं शमादीनामंतरंगत्वं स्फुटमेवोक्तं किंच शमदमवैराग्यदार्ढ्यपर्यंतं कर्मानुष्ठानमेवेति सूचि
तं ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येति यावत्॥ आत्मनैर्लब्धये आत्मज्ञानाय तत्फलकामतत्त्व
मस्यादिवाक्यार्थविचाराय सद्गुरुं श्रोत्रियं ब्रह्मनिष्ठमित्यादिलक्षणलक्षितं समाश्रयेत् सेवेत् अनेन श्रु

स्पत्तिबलेनस्वयमेववाक्यार्थविचारः क्रियमाणेन फलायेतिसूचितं ॥ ७ ॥ संसारस्य भ्रमितचक्ररूपत्वात्तन्नि
वृत्तेश्च तत्कारणाज्ञाननिवृत्तिमूलकत्वादज्ञाननिवृत्तेश्च तत्वज्ञानैकसाध्यत्वात् ॥ तत्वज्ञानस्य च वेदांतविचा
रसाध्यत्वात्तदर्थं गुरुसमाश्रयेणमित्याह क्रियेति भवः संसारश्चक्रवद्विपरीवर्त्तमान ईर्यते कथ्यते तद्देवो
पपादयति ॥ आदृता ॥ आदरपूर्वं जन्मार्जिताः क्रिया एतस्य शरीरोद्भवस्य जन्मनो हेतुः ॥ तत्र जन्मनि सुरागिणो

क्रियाशरीरोद्भवहेतुरादृता प्रियाप्रियौ तौ भवतः सुरागिणः ॥
धर्मेतरौ तत्र पुनः शरीरकं पुनः क्रिया चक्रवदीर्यते भवः ॥ ८ ॥

विषयाभिलाषवतः ॥ तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौ सुखदुःखजनकौ भवतः कस्यचि
द्धर्म एव सुखत्वबुध्या प्रवृत्तिः कस्यचिद्धर्मे एवं कदाचिदित्यप्यूहं एवं तत्रोत्पादितकर्मणा पुनः ॥ शरीरं पुनः
क्रिया इत्येवं चक्रवद्विपरिवृत्तिर्यथा चक्रे भ्राम्यमाणेऽधोमार्गः ॥ कदाचिदुपरि उपरितनश्चाधः ॥ पुनरुपरि
पुनरध एवं जन्मक्रिययोर्जन्यजनकभावेन परिवृत्तिरिति बोध्यं ॥ ८ ॥ श्रीरामायनमोनमः ॥ ॥॥० ॥०॥

तस्य चाज्ञानमेव मूलमित्याह ज्ञानमेवेति॥ अत्र विधौ संसारनिवृत्तिलक्षणे कर्त्तव्ये यत्ने तद्धानमेव मूलकारणत्वा
द् ज्ञानहीनमेव विधीयते साधनत्वेति शेषः॥ ननु कर्मैव तन्नाशकमस्तु किं ज्ञानेनेत्याशंक्याह विद्यैव ज्ञानमे
व तन्नाशविधौ मूलाज्ञाननाशजनने पटीयसी समर्था न कर्म समर्थमिति शेषः॥ यतस्तज्जं अज्ञानजं आ
त्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात् कर्मणो ज्ञानजन्यत्वं बोध्यं ननु तज्जन्यस्यापि तन्नाशकत्वं

अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते॥ विद्यै
व तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितं॥९॥ नाज्ञा
नहानिर्न च रागसंक्षयो भवेत्ततः कर्मसदोषमुद्भवेत्॥ ततः पु
नः संसृतिरप्यवारिता तस्माद्बुधो ज्ञानविचारवान्भवेत्॥१०॥

वृश्चिककर्कघातादौ दृष्टमित्याशंक्य तज्जन्यत्वं वा तन्नाशकत्वे प्रयोजकं किंतु सविरोधत्वमेवेत्याह॥ यस्य विरोधं
तदीरितं नाशकमुक्तमित्यर्थः॥९॥ अत एव कर्मणा नाज्ञानहानिरित्याह नाज्ञानेत्यादि यतः कर्मणा विरोधा
भावान्नाज्ञाननाशो नापि रागनाशो ततस्ततः कर्मानुष्ठानात् पुनः पुनः सदोषं स्वपि फलत्वादिदोषं विशिष्टं
कर्मैवोद्भवेत् कर्मणश्च पुनः संसार एवेति न मुक्तिरस्याशा ततस्तस्माद्बुधो विवेकी ज्ञानविचारवान् ज्ञाय
तेऽनेनेति ज्ञानं वेदांतवाक्यं तद्विचारवान्भवेत्॥१०॥

इदानीं ज्ञानस्यैव मोक्षहेतुत्वे वक्तुं ज्ञानकर्मसमुच्चयवादं दूषयितुमनुवदति सार्धेन नन्विति शंकायां यथा वि-
द्या वेदमुखेन श्रुतिस्मृतिपुराणलक्षणेन ब्रह्मविदाप्नोति परमित्यादिना पुरुषार्थसाधनमुक्ता तथा उभाभ्या-
मेव पक्षाभ्यां यथा खे पक्षिणां गतिः । तथैव ज्ञानकर्मभ्यां प्राप्यते ब्रह्म शाश्वतमित्यादिना क्रियापि तत्सा-
धनत्वेनोक्ता किंच क्रिया कर्तव्यता तृतीयार्थे प्रथमा कर्तव्यतया आवश्यकेत्यर्थः । आवश्यकर्तव्यतया प्र-
चोदितानि त्यनैमित्तिकरूपा एवं च तदकरणे प्रत्यवायोत्पत्त्या ज्ञानोत्पत्तिरेव न स्यात् । तस्मात्सा पुनर्विद्या

ननु क्रिया वेदमुखेन चोदिता यथैव विद्या पुरुषार्थसाधनं । कर्तव्यता प्राणभृतः प्रचोदिता
विद्यासहायत्वमुपैति सा पुनः ॥११॥ कर्माकृतौ दोषमपि श्रुतिर्जगौ तस्मात्सदा कार्यमिदं मुमु-
क्षुणा ॥ ननु स्वतंत्रा ध्रुवकार्यकारिणी विद्या न किंचिन्मनसाप्यपेक्षते ॥१२॥ ॥श्रीराम॥

यासहायत्वं प्राप्नोति घटे जननीये यथा दंडचक्रादीनां परस्परसहायता ॥११॥ कर्तव्यतेति रचोक्तमेव विवृणो-
ति कर्मेति वीरहा वा एष देवानां योग्निमुद्वासयते यावज्जीवमग्निहोत्रं जुहोतीति श्रुतिः । तत्र सिद्धांती शंकते न-
न्विति ध्रुवं स्थिरं कार्यपदं पुरुषार्थं मोक्षजनिका विद्या यतः स्वतंत्रा विनापि सहायेन स्वकार्यसंपादने समर्था
यथा तेजस्तिमिरनिवर्तने समर्थं मनसापि किंचित् सहायभूतं वस्तु नापेक्षते तथा फलजननी ये सहायां-
तरसंभावनापि नेति भावः । अनेन विद्याफलजनने निरपेक्षा स्वतंत्रत्वात्तेजोवदित्यनुमानं सूचितं ॥१२॥

समुच्चयवादीपरिस्त्वदुक्तं वेत्यर्थः सत्यकामैः॥ अक्षय्यं ह वै चातुर्मास्ययाजिनः सुकृतं भवतीत्यादिवेदेन बोधित
स्थिरकार्योऽपि अध्वरः यथान्यानपि कारकादिकान्॥ आरादुपकारकप्रयाजाद्यंगानि देशकालादीनि च प्रकांक्षते
तथा विद्यापि अग्निहोत्रं जुहोतीत्यादिविधिवाक्यतः॥ तत्समूहेन प्रकाशितैः कर्मभिः सहितैव मुक्तये विद्याफ
लप्रदाने कार्मापेक्षा अंगित्वात्॥ प्रयाजाद्यंगापेक्षदर्शादिवदिति सत्यतिपेक्षानुमानमनेन सूचितं १३ तदनू
द्य सिद्धांती दूषयति केचिदिति॥ यत्केचिद्वितर्कवादिन इति ज्ञानकर्मणोः समुच्चित्य मुक्तिसाधनं वदंति तदप्यस

१व

न सत्यकार्योऽपि हि यद्वदध्वरः प्रकांक्षतेऽन्यानपि कारकादिकान्॥ तथैव विद्या विधितः प्रका
शितैर्विशिष्यते कर्मभिरेव मुक्तये॥१३॥ केचिद्वदंतीति वितर्कवादिनस्तदप्यसद्दृष्टविरोधका
रणात्॥ देहाभिमानादभिवर्धते क्रिया विद्या गताहंकृतितः प्रसिध्यति॥१४॥ रामायनमोन

त्॥ यथा केवलं कर्म मोक्षसाधनमित्यसत्॥ तथा तन्मिलितमित्यप्यसत् तत्र हेतुः दृष्टविरोधकारणात् दृ
ष्टो यो विरोधरूपात्कारणात् तदसदित्यर्थः विरोधमेवाह देहाभिमानात् क्रिया वर्धते॥ अनात्मनि देहादावात्म
त्वाभिमानात् क्रियाप्रवृद्धिः॥ विद्या तु गताहंकृतितः॥ गताहंकृतिर्यस्य तस्मान्नसाहंकृतेः॥ प्रसिध्यति सर्वा विभक्ति
कस्तसिः॥ एवं चाहंकारसत्तामूलकत्वात् क्रियाज्ञानयोः॥ समुच्चयो विरुद्ध इत्यर्थः॥१४॥ ॥ ॥ ॥

अथ पूर्वपक्ष्युक्तानुमानं दूषयन्विद्यास्वरूपमाह ॥ विशुद्धेति विशुद्धं विज्ञानं येभ्यस्तेषां वेदांतवाक्यानां यद्विशेषेण रोचनं रत्नयोरभेदादालोचनं विचारस्तेनांचिता प्रापिता या चरमा आत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः सा विद्येति भण्यते विद्भिरिति शेषः पुनः समुच्चयवारणाय विद्याकर्मणो वैषम्यमाह कर्मयज्ञादिअखिलकारदिभिः कर्तृकर्मादिभिरंगैश्च सहितं संदद्देति फलायोन्मुखं भवति विद्या कर्मणो पुनरखिलकारककारिनिहंति तत्र कर्तृत्वादिबुद्धिं निहंति सकलव्यापारपरित्यागेन ब्रह्मणि समाप्तिर्हि विद्या अतः ॥ सा चोत्पत्तौ चित्तशुद्धि

विशुद्धविज्ञानविरोचनांचिता विद्यात्मवृत्तिश्चरमेति भण्यते ॥ उदेति कर्माखिलकारकादिभिर्निहंति विद्याखिलकारकादिकं ॥१५॥ तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्न समुच्चयो भवेत् ॥ आत्मानुसंधानपरायणः सदा निवृत्तसर्वेंद्रियवृत्तिगोचरः ॥१६॥ ॥ छ ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥

द्वारा कर्मसापेक्षा स्वफलेजनयितव्ये तन्निरपेक्षैव अन्यथा विद्यास्वरूपस्यैव भंगापत्तेरिति पूर्वपक्ष्युक्तहेतोरसिद्धिरिति भावः ॥१५॥ उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधात् विद्यायाः कर्मणा सह विरोधेन समुच्चयो न भवेत्तस्मात् सुधीर्मुमुक्षुरशेषतः कर्म त्यजेत् ॥ काम्यं तु सर्वथा त्याज्यमेव नित्यनैमित्तिकं यावच्चित्तशुद्धि कर्तव्ये एव ततोपि ब्रह्मणि चित्तस्थैर्यपर्यंत कर्तव्ये एव ततस्तदनुसंधानप्रतिबंधकत्वात्त्याज

नाभावाच्च तदपि त्याज्यमेवेति भावः। इदानीं मुमुक्षोः कर्त्तव्यमाह निर्वृत्ताः सर्वेषामिन्द्रियाणां गोचरा विषयाः शब्दाद
यो यस्मात्ताद्दशः सन् आत्मनः सच्चिदानंदस्यानुसंधानमेव परमनयं प्राप्यं यस्य तथा विधो भवेत्॥ अत्रैं द्वि
यश्लोकस्याहारः कर्त्तव्यत्वे नोक्तस्तेन तत्सर्वं माणायामा घर्याल्लिसं ॥१६॥ रागि विरागि भेदेन कर्मणां कर्त्तव्यताक
र्त्तव्यते आह ॥ यावदिति मायया विद्यया शरीरादिषु नात्मसु आत्मधीः अहं कर्त्ते त्यादिरूपाया वर्त्तते तावद्वि

यावच्छरीरादिषु माययात्मधीस्तावद्विधेयो विधिवादकर्म
णां॥ नेतीतिवाक्यैरखिलं निषिध्य तज्ज्ञात्वा परात्मानमथ त्यजे
त्क्रियाः ॥१७॥

धिवादकर्मणां विधिर्यजेतेत्यादिश्रुतिर्वादकर्त्तव्यताबोधकस्तेषां कर्मणां विधेयो वशवर्त्तीति कर्त्ता भवे
त् तदपनमेतु तदखिलं जगत् नेतीतिवाक्यैः॥ अथात आदेशो नेति नेतीत्यादिवाक्यैर्निषिध्य मिथ्यात्वेन नि
र्णीय तच्छिष्टं सत्तयासत्त्वेन परमात्मस्वरूपं ज्ञात्वा क्रियास्त्यजेत् निरूपितमेतत् ॥१७॥ ॥ ॥ ॥

आत्मविज्ञाने सत्यव श्यम विद्यानिवर्त्तत इत्याह ॥ यदेति ॥ आत्मनि शुद्धांतःकरणे परात्मनर्ईशस्यात्मनो जीव
स्य च योविभेदो मायातःकरणरूपोपाधिद्वयकृत्तोविभेदोभेदस्तस्य भेदकं नाशकं भास्वरं प्रकाशरूपीलं यद्विज्ञा
नंइतरहस्तुपमर्द्दनपूर्वकं ब्रह्माकारांऽखंडाकृत्तिर्यदाव भाति असंभावनादितिरस्कारेः णेदेति तदैव सकारक्ता
जन्मांतरप्रापककर्मसहिता मायात्तत्जीवोपाधिभूताऽविद्यांजसाद्रुदितिविलीयतेन श्यतिननु तन्नाशेपि
संसारनाशःकथयतोमायाविशेषणं ॥ आत्मसंसृतेःकारणं संसारस्योपादानकारणमेवंचतन्नाशेकार्यना

यदापरात्मात्मविभेदभेदकं विज्ञानमात्मन्यवभातिभास्वरं ॥ तदैवमायाप्रविलीयतेंजसासका
रकाकारणमात्मसंसृतेः ॥ १८ ॥ श्रुतिप्रमाणादिभिनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी
विज्ञानमात्रादमलाद्वितीयतस्तस्माद्विद्यानपुनर्भविष्यति ॥ १९ ॥

॥ शोभवत्येवेतिभावः ॥ १८ ॥ उक्तमे
वार्थंपुनर्वैशद्यायाह ॥ श्रुतीतितत्त्वमसीत्यादिश्रुतिरूपैः प्रमाणैस्तज्जनितेज्ञानेननाशितासाविद्याकथ
मपिकार्यकारिणीभविष्यतीकाकुरत्रसर्वथानेत्यर्थः ॥ असतःकार्यकारित्वासंभवादितिभावपुनश्चत
स्यानोद्भवइत्याहविज्ञानमात्रादितिअमलाद्वितीयतःशुद्धाद्वितीयात्मविषयकविज्ञानमात्रादितरास
हकृतान्निदिध्यासनपरिपाकजाज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यतिरज्जुज्ञानमूलकस्यसर्पस्येव

अ० उ०
२२

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयति श्लो तदाद्यपियदीतियदिन
ष्टातत्त्वज्ञाननाशितासानपुनःप्रसूयतेनोत्पद्यते तदाकारणाभावादहंमतिःकथं॥भवेत्कथमपिनभवेदित्य
र्थः तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसाक्षात्स्वतंत्राइतरनिरपेक्षैवनकिमप्यपेक्षितेद्वितीयस्मासं
भवात्॥ अतःकेवलाऽसहायैवविमोक्षायविभातितत्स्फुटिकाभवतीत्यर्थः॥२०॥ अत्रार्थेश्रुतिरपिप्रमाणं

यदिस्मनष्टानपुनःप्रसूयतेकर्त्ताहमस्येतिमतिःकथंभवेत्॥ तस्मात्स्वतंत्रानकिमप्यपेक्ष
तेविद्याविमोक्षायविभातिकेवला॥२०॥ सा तैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलक
र्मणांस्फुटं॥ एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनं॥२१॥ ॥छ॥

मित्याह॥ सेतिसाप्रसिद्धानकर्मणानप्रजयाधनेनत्यागेनैके॥ अमृतत्वमानशुरित्यादिकातैत्तिरीयश्रुतिः
प्रशस्तानामर्थवादैः॥ प्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागं॥ सादरंस्फुटमाह नतुकर्मसमुच्चय
मित्यर्थः॥ तथावाजिनां वाजसनेयिनां॥ एतावदरेखल्वमृतत्व॥ मित्यादिकाज्ञानंविमोक्षायसाधनंन
कर्मेत्येतदाह॥२१॥ ॥० ॥० ॥० ॥० ॥०॥०॥०॥ ०॥०॥०॥ ०॥ ०॥ ०॥ ॥ ०॥०॥ ०॥ ०॥

राम०
२२

अहंकारतत्यागरूपकारणवैषम्यामत॥ क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमपि वैषम्यमाहविद्येतिहेस
मुच्चयवादिनत्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेन दर्शितः परंतु समो दृष्टांतो नोदाहृतः॥ अनेनक्रतुर्विद्या
समः श्रुतिबोधितकर्तव्यताकत्वात् इत्यनुमानं निरस्तं दृष्टांताभावात॥ अन्वय्येवानुमानंनव्यतिरेकीतिभा
वः॥ एतद्वारकरेविस्तरेणप्रपंचितंननु विद्याकर्मणीसमेएकफलत्वाद्व्रक्रदंडादिवदित्यमानमितिचेत्त

सितैत्तिरीयश्रुतिरहसादरंन्यासंप्रशस्ताखिलकर्मणांस्फुटं॥ एतावदित्याहचवाजिनो
श्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनं॥२१॥ विद्यासमत्वेनतुदर्शितस्त्वयाक्रतुर्नदृष्टांतउ
दाहृतः समः॥ फलैःपृथक्त्वाद्बहुकारकैःक्रतुः संसाध्यतेज्ञानमतोविपर्ययं॥२२॥ ॥

त्राहफलैः॥ पृथक्त्वात॥ षष्ठ्यर्थेतृतीयाफलानांभेदादित्यर्थः॥ एवंचस्वरूपासिद्धोहेतुरितिभावः
समानकारकत्वमपिहेतुर्नेत्याह॥ क्रतुर्बहुभिः॥ कारकैः रहंममताभिमानरूपैरंतरैर्बाह्यैश्चदेशकाला
दिनियमैश्चसाध्यतेज्ञानंत्वतोविपर्ययंवदतोनतयोः॥ साम्यमितिभावः॥२२॥ श्रीरामायनमः
श्री॥॥ श्री॥श्री॥ श्री॥श्री॥॥ श्री॥॥श्री॥ श्री॥॥ श्री॥॥ श्री॥॥ श्री॥ श्री॥॥ श्री॥॥श्री॥॥श्री॥

रा॰अ॰उ॰
२२

नन्वकरणे प्रत्यवायभिया कर्म कार्यमिति चेन्नेत्याह समप्रत्यवाय इति कर्मत्यागे हि निश्चयेनाहं प्रत्यवायसहि
तो भविष्यामीत्येवं शुद्धात्मनि अनात्मधर्मस्य धीरज्ञस्य तत्वज्ञानविकलस्य प्रसिद्धा न तु तत्वदर्शिनः तस्मा
हं बुद्धेरभावात्॥ पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैः कर्मक्रियात्मभिः॥ षष्ठ्यर्थे तृतीया क्रियाफ
लासक्तक्षिप्तानां विधानतो विधानेनेति कर्त्तव्यतया युक्तं कर्म विधिभिरेव एव कर्त्तव्यतया बोधि

चिन्तामा

समत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा न तु तत्वदर्शिनः॥ तस्माद्बुधैस्त्या
ज्यमपि क्रियात्मभिर्विधानतः कर्मविधिप्रकाशितं॥२३॥ श्रद्धान्वितस्तत्वम
सीति वाक्यतो गुरोः प्रसादादपि शुद्धमानसः॥ विज्ञाय चैकात्म्यमथात्मजी
वयोः सुखी भवेन्मेरुरिवाप्रकंपनः॥२४॥

॥ तमपि त्याज्यमित्यर्थः॥२३॥ अथ पविर
क्तस्य कार्यमाह॥ श्रद्धेति गुरुशास्त्रयोर्विश्वासः श्रद्धा तदन्वितो बुभुत्सुः शुद्धमानसोऽपि निष्कामकर्मा
नुष्ठानामानसश्च गुरोः प्रसादाल्लब्धतत्वमसीति वाक्यतः श्रुतमात्मजीवयोरैकात्म्यं विज्ञाय मनन
निदिध्यासनपरिपाकाभ्यां साक्षात्कृत्य च एवार्थः॥ साक्षात्कृत्यैव सुखी भवेत्॥ सकलदुःखही
नो भवेदित्यर्थः॥ अप्रकंपनः विषयाभिलाषाक्षोभितांतःकरणः॥२४॥

ए म॰
२२

महावाक्यं विचरीतुं वाक्यार्थस्य पदार्थस्य पदार्थबोधपूर्वकत्वमाह ॥ आदाविति विधानतः क्रमप्रमादरहि
त्येन वाक्यार्थविज्ञानस्य विधावुत्पत्तौ आदौ प्रथमं मुख्यमिति यावत् ॥ पदार्थावगतिः कारणं हि प्रसि
द्धं तस्य पदद्वयं तत्त्वमसीति तत्र तत्पदार्थः परमात्मा सर्वज्ञत्वादिगुणः त्वंपदार्थो जीवः ॥ अनयोस्तत्त्वंप
दार्थयोरैकात्म्यं तद्बोधकमसीति पदं ॥ २५ ॥ ननु सर्वज्ञत्वादिगुणस्येशस्य किंचित् ॥ त्वधर्मवता जीवेनै
कात्म्यं विरुद्धमित्याशंक्याह ॥ प्रत्यगिति अहंबुद्धिवेद्यत्वं प्रत्यक्त्वं जीवधर्मः ॥ परोक्षत्वमीशधर्मस्त

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥ तत्त्वंपदार्थौ परमात्म
जीव[illegible]कावसीति चैकात्म्यमथानयोर्भवेत् ॥ २५ ॥ प्रत्यक्परोक्षादिविरोधमात्मनोर्विहा
य संगृह्य तयोश्चिदात्मतां ॥ संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्व
योभवेत् ॥ २६ ॥

दादिधर्मकृतमात्मनोः ॥ परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशो
धितां युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां प्रत्यक्त्वभावेऽपि बहुप्रमाणप्रकारया लक्षणया लक्षितां ज्ञा
त्वा चिदात्मतां संगृह्य तत्त्वंपदतो यस्थिति विषया ॥ कृत्वा स्वमात्मानं तथा ज्ञात्वाऽद्वय ऐकात्म्यज्ञानानंत
रं अद्वयो भवेत् चित्स्वरूपतां प्राप्त इव भवेत् ॥ पूर्वमपि तत्स्वरूप एव विस्मृतकंठचामीकरन्यायेन च त
त्प्राप्तिरतएव इवेति उक्तं अयं भावः ॥ तत्त्वंपदयोर्द्वंद्वबोधो वा मोक्षस्य ॥ तत्र तत्पदस्य मायोपाधिः सर्व

ज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किंचिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदंतःकरणो
पाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धचिदात्मा लक्ष्यः। तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभ
वेपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥२६॥ उक्तलक्षणास्वरूपमाह ॥ एकात्मकत्वादिति जहतीलक्षणा जहत्स्वा
र्थलक्षणा यथा गंगायां घोष इत्यत्र गंगापदार्थस्य प्रवाहस्य ॥ घोषाधारतानुपपत्त्या सर्वथा तत्परित्या
गेन तीररूपार्थलक्षणा साप्राप्ता तेन एकात्मकत्वात् ॥ विशेष्यांशस्यैकत्वात् सर्वथा स्वार्थत्यागाभावात्त
था जहल्लक्षणता जहत्स्वार्थलक्षणावत्त्वमप्यत्र न संभवति यथा काकेभ्यो दधिरक्ष्यतामित्यादौ का

एकात्मकत्वाज्जहती न संभवेत्तथाजहल्लक्षणता विरोधतः ॥
सोऽयंपदार्थाविव भागलक्षणा युज्येत तत्त्वंपदयोरदोषतः ॥२७॥

पदार्थस्यार्थत्यागे नैव दध्युपघातके लक्षणा सापि न विरोधतः ॥ विशेषणत्यागेन सर्वथा स्वार्थत्या
गाभावात् ॥ अतो भागलक्षणा ज्जहदजहल्लक्षणा युज्येत अदोषतः पूर्वोक्तदोषाभावात् ॥ विशेष्यांशस्या
त्यागाद्विशेषणांशस्य त्यागाच्च तत्र दृष्टांतः ॥ सोऽयंपदार्थाविव यथा सोयं देवदत्त इत्यत्र तद्देशादिविशि
ष्टोतीतानुभवविषयो वा तत्पदार्थः ॥ एतद्देशादिविशिष्टोनुभूयमानो वेदशस्तदर्थः तयोश्च विरुद्धविशेष
णकत्वादैक्यासंभवेन देशादिरूपविशेषणत्यागेनानुभगवतातीतत्वादिविशेषणत्यागेन वा लक्षणा

८

अथास्याऽन्यत्वाय जीवस्योपाधिमाह रसादीति रसा पृथ्वी आदिर्येषां तानि पंचीकृतानि यानि भूतानि तेभ्यो
संभवो यस्य तत् पंचीकरणं चेत्थं एकैकं भूतं द्विधा विभज्य तत्रैकं भागं चतुर्धा विभज्य तेषां भागानां स्वेतरभू
तचतुष्टयीयार्धभागचतुष्टये संयोजने एकैकभूतं पंचात्मकं भवति भागाधिक्याच्च प्रातिस्वीकं यातया
भूतादिव्यवहारोऽपि सुखदुःखयोरादीनि कारणानि आयानि कर्म्माणि तेषां योगस्तत्कर्मजं सुखदुः
खानुभवस्तस्यालयं आश्रयभूतमायतनं वत उत्पत्तिनाशयोगि आदिकर्मजं। प्रारब्धवीय कर्मजन्यं मा
यामयं परंपरयाभ्यां पाधिकारस्तद्विकार भूतविकारत्वात् ॥ एतच्छरीरं आत्मन स्थूलमुपाधिं वदंति

रसादिपंचीकृतभूतसंभवं भोगालयं दुःखसुखादिकर्मणां ॥ शरीरमाद्यंत
वदादिकर्मजं मायामयं स्थूलमुपाधिमात्मनः ॥८८॥ सूक्ष्मं मनोबुद्धिदशें
द्रियैर्युतं प्राणैरपंचीकृतभूतसंभवं ॥ भोक्तुः सुखादेरनुसाधनं भवेच्छरी
रमन्यद्विदुरात्मनो बुधाः ॥८९॥

इति शेषः ॥८८॥ अथ सूक्ष्मोपाधिमाह ॥ सूक्ष्ममिति बुधा अन्यत् स्थूलशरीरविलक्षणं शरीरं लिंगदेहा
ख्यं आत्मन उपाधिं विदुः ॥ तत्स्वरूपमाह सूक्ष्मं च क्षुरणघविषयः ॥ मनोबुद्धिदशेंद्रियैः ॥ प्राणैश्च युतं
संकल्पात्मकं मनः निश्चयात्मिका बुद्धिः ॥ घ्राणरसनचक्षुस्त्वक्श्रोत्रेति पंच ज्ञानेंद्रियाणि ॥ वाक्पाणिपा
दपायूपस्थाख्यानि कर्मेंद्रियाणि प्राणापानव्यानोदानसमानाख्यप्राणास्तैर्युतं एवं सप्तदशमुद्रा। यात्मकं
तदाधारभूतान्याह। पंचीकृतभूतसंभवं तेभ्य उत्पन्नं अत। एवादृश्यं तथा भोक्तुः सुखादेः सुखदुःखाद्य

नुभवसाधनं स्थूलशरीरमित्यन्वयः
साधनं लिंगमात्मनः प्रत्यक्षे कोशेऽत्र
अत्र हस्तलिखितं ॥४८॥

पं०द०अ०
२५

इति जीवोपाधिद्वयमुक्त्वा कारणोपाधिमाह ॥ अनादीति अनादि उत्पत्तिहीनं नानाविधपरिणामशालितया परिणामरूपेण नश्वरमिति अनादित्वमात्रेणास्या सूचितं अनिर्वाच्यं सत्त्वासत्त्वाभ्यां निर्वक्तुमशक्यं कारणं सकलप्रपंचस्य जनकं ईदृशी माया तु ब्रह्मणः परं ईश्वरस्य व्यवहारसंपादकत्वादुत्कृष्टं प्रधानं शरीरकं स्वार्थे कः एवमुपाधिभेदादेकमेव चैतन्यं यतः पृथक् स्थितं जीवईश इति भेदबुद्धिविषयमतो लक्षणयोपाधिपरित्यागेन स्वात्मानमात्मनि अवधारयेद् अभेदेन जानीयात् क्रमात् श्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ४० ॥ अथ वाक्यार्थविचारफलमाह ॥ कोशे ष्विति आनंदमयस्य ब्रह्मत्वे अन्नमय

अनाद्यनिर्वाच्यमपीह कारणं मायाप्रधानं तु परं शरीरकं ॥ उपाधिभेदात्तु
यतः पृथक् स्थितं स्वात्मानमात्मन्यवधारयेत् क्रमात् ॥ ४० ॥ कोशेष्वयं तेषु तु तत्त
दाकृतिर्विभाति संगात्स्फटिकोपलो यथा ॥ असंगरूपोयमजो यतोद्वयो विज्ञा
यतेस्मिन्परितो विचारिते ॥ ४१ ॥

प्राणमयमनोमयविज्ञानमयेषु चतुर्षु कोशेषु तत्तत्संगात्तत्तदाकृतिर्विभाति यथा जपादिसंगात्स्फटिको नेकाकृतिर्भाति आनंदमयस्यापि जीवत्ववादिनां तु तेन सह पंचासु कोशेष्विति बोध्यं अस्मिन् महावाक्ये परितो विचारिते सम्यग्विचारिते सत्ययमात्मा असंगरूपः अन्नमयादिभिः संगरहितः ॥ असंगो न हि सज्जते इति श्रुतेः ॥ अजो द्वयश्च विज्ञायते स्थूलोहं मिलादिस्त्वज्ञस्य तत्तत्कोशसंगात्वतीतिः स्फटिकवत् तत्वज्ञस्य तु न तथा प्रतीतिरिति भावः एवं च तत्तदुपाधिकृतं तत्तद्रूपता प्रतीति

एम०
२५

जाग्रदाद्यवस्थापि बुद्धिधर्मो नात्मधर्म इत्याह बुद्धेरिति इह आत्मनि स्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्ति
भेदेन या त्रिधा वृत्तिर्दृश्यते सापि गुणत्रयात्मनः॥ सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्म उक्ताव
स्थात्रयस्योक्तगुणमूलकत्वादेतदवस्थात्रयस्यास्मिन्नवस्थात्रयसाक्षिणि आत्मनि मानं स्वषा बुध्य
ध्यासनिबंधनेन तु वास्तवमित्यर्थः॥ अन्योन्यतो व्यभिचारतोऽस्तस्यावस्थात्रयस्य स्वरूपतो मृषात्वा
त् तद्दानस्य मृषात्वमेव स्वप्नकाले जाग्रत्सुषुप्त्योरभावाज्जाग्रति इतरद्वयस्याभावात् सुषुप्तावि

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादिभेदेन गुणत्रयात्मनः॥ अन्योन्यतोऽस्मिन्व्यभिचारतो मृ
षा नित्ये परे ब्रह्मणि केवले शिवे॥३१॥ देहेंद्रियप्राणमनश्चिदात्मनां संघातमजस्रं परिवर्त्त
ते धियः॥ वृत्तिस्तमोमूलतयाज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३२॥

॥तयोरभावात्पर
स्परं व्यभिचारो बोध्यः आत्मनस्तदनाश्रयत्वं विशेषणैराह नित्ये उत्पत्तिनाशशून्ये परे गुणत्रयाती
ते ब्रह्मणि व्यापके केवलेऽसंगे शिवे आनंदरूपे एवंभूते सदैकरसे परस्परव्यभिचारिधर्ममानन्नसं
भवतीति भावः॥३१॥ अथ त्याज्यतया संसारमूलभूतां वृत्तिमाह॥ देहेति एषां संघातमितरेतराध्या
सविषयात्॥ अजस्रं यावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाज्ञलक्षणा अज्ञत्वज्ञापिका तं यावत्परिवर्त्तते ता
वद्भवोद्भवं संसारोद्भवो भवेत् तमःपदं रजसोऽप्युपलक्षणं रजस्तमःप्रधाना बुद्धिः संसारहेतुत्वात्सर्व

व्याख्यारेति भावः ॥१९॥

कृतामहावाक्यविचारस्यकर्त्तव्यमाहनेतीति॥ अथात आदेशोनेतीतिप्रमाणेन निराकृतंमिथ्यात्वेनगृहीतम
खिलंजगद्येनसः॥ ततोहृदासत्वप्रधानेनमनसासम्यगास्वादितंचिद्घनामृतंदुःखासंभिन्नसुखं
वयेनसः॥ स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव एवंभूतोऽशेषंजगत् देहेंद्रियादिदृश्यसमूहंत्यजेत्
हानोपादानबुद्धिविषयंनकुर्यात्॥ किंतूदासीनस्तत्रभवेत् ननुदेहेंद्रियादिभिरेवतत्॥ ज्ञानलाभात् कथ

नेतिप्रमाणेननिराकृताखिलोहृदासमास्वादितचिद्घनामृतः॥
त्यजेदशेषंजगदात्तसद्रसंपीत्वायथांभःप्रजहातितत्फलं॥३४॥

मुपजीव्यस्यत्यागइत्याशंक्यदृष्टांतदर्शनेनपरिहरतियथातृषावान् आर्त्तः॥ सद्रसोमाधुर्यंयेनताद्द
शंनारिकेलनारंगादिफलांतर्वर्त्यंभः॥ पीत्वातस्यानभूतेतत्फलंउज्जहातितत्रोदासीनोभवतितद्वत्सर्वं
दृश्यसारंशोत्रलतत्त्वलाभेसतिनिःसारंदृश्यंनोपादेनापिहेयमितिभावः॥ यतोभ॥पादिसंभावनातद्धे
यमित्युच्यते ॥३४॥ ॥

इतरस्यानित्यत्वेन तत्र वैरूप्यापर्यमात्मन एव नित्यत्वमात्व कदाचिदिति कदापीत्यर्थः॥ अनवः३ उत्पत्त्यनंतरवि
द्यमानो हि नवः॥ तेन जन्मानंतरास्तित्वव्यावृत्तिः नवत्वाभावेनैव जीर्णत्वाभावाद्वस्थांतरापत्तिरूपपरिणा
मोपि निरस्तः॥ अनेन जायतेस्तिविपरिणमते वर्धतेक्षीयते नश्यतीति षड्भावविकाराणां हित्वमुक्तं एवं चै
तद्भिन्नं सर्वमुक्तषड्भावविकारवत्वादनित्यमिति ततो विरज्येति बोधितेयं तद्दृशेत एव निरस्तः सर्वस्य
देहेंद्रियादेरतिशयो महत्वं येन स लाभात्सः॥ यल्लाभान्नापरो लाभ इति श्रुतेन्यतः सुखात्मकः आनंदरू
पः स्वयंप्रभः स्वप्रकाशश्च देहेंद्रियादिरिक्त दुःखरूपः परप्रकाश्यश्च यस्य भासा सर्वमिदं विभातीति श्रुतेः

कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धते नवः॥ निरस्तसर्वातिशयः
सुखात्मकः स्वयंप्रभः सर्वगतोयमद्वयः॥३५॥ एवंविधे ज्ञानमये सुखात्मके क
थं भवो दुःखमयः प्रतीयते॥ अज्ञानतोध्यासवशात्प्रकाशते ज्ञाने विलीयेत
विरोधतः क्षणात्॥३६॥

सर्वगतो व्यापकः अयमहंबुद्धिविषयः॥ प्रत्यगात्मापि अद्वयः॥ उक्ताद्वयब्रह्मस्वरूप एव न ततोतिरिक्त इति
भावः अयमात्मा ब्रह्मेति श्रुतेः॥३५॥ नन्वेवंविधे विकारशून्ये॥ आत्मनि जन्ममरणादिप्रवाहरूपसंसारभा
नं कथमिति शंकते एवंविधे इति दुःखमयः दुःखप्रचुरः उत्तरयति अज्ञानत इति अज्ञानमूलको योध्या
सो देहांतःकरणादौ अहंममेत्यध्यासस्तद्वशात्॥ एवं च भ्रांतिरूपात्तत्प्रतीतिरिति भावः॥ नन्वेवं तर्ह्येतस्य
संसारस्यानिवृत्तिस्तत्राह ज्ञाने इति आविर्भूते इति शेषः॥ ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षण एव कार
णभूताज्ञाननाशेन त्कार्यसंसारस्यापि विलय इत्यर्थः॥ यथा रज्जुज्ञानेन रज्जु [illegible] सर्पस्य लय इत्यर्थः॥३६॥

अथाध्यासलक्षणमाह॥ यदन्यदितियदन्यत्सर्पादिकमन्यत्र रज्ज्वादौ भ्रमात् भ्रमजनकात्॥ दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसो ध्यास इत्याहुः यथा सर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्जुबुद्धिमूलकस्तद्वदीश्वरे पि जगत् देहादिसंसारात्मकं॥ सर्वं विभाव्यते॥ आत्मज्ञानाभावाद्यथा सर्पस्तथा ज्ञायते ॥२७॥ आत्मनि जगज्ज्ञाने कीदृशो ध्यासो निमित्तं तदाह॥ विकल्पेति॥ सर्वविकल्पकारणमाहंकार

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥ असर्पभूते हिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥२७॥ विकल्पमाया रहिते चिदात्मके ऽहंकार एव प्रथमः प्रकल्पितः॥ अध्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे॥२८॥ ॥छ॥ ॥छ॥ ॥छ॥

हिते वस्तुतस्तत्संगरहिते चिदात्मके चित्स्वरूपे सर्वकारणे निरामये दुःखासंभिन्नानंदमये केवले सर्वविकारशून्ये परे दृश्यविलक्षणे ब्रह्मणि व्यापके॥ आत्मनि प्रथमम् अहंकारः॥ कल्पितः॥ स एवाध्यासः॥ अहंबुध्यात्मको ध्यास एव सर्वसंसारकारणमिति भावः॥२८

बुद्धीनिष्ठ एव संसारेऽस्मिन्नात्मनिष्ठ इत्यत्रान्वयव्यतिरेकौ प्रमाणम् इति ॥ इच्छादीति ॥ परे सर्वसाक्षिणि आत्मनि संसृति
हेतवः भासमानसंसारकारणं सदा कालत्रयेऽपि इच्छादिरागादिसुखादिधार्मिकाः ॥ इच्छोपेक्षे रागद्वेषौ सुखदुः
खे इत्येवमादिद्वंद्वधार्मिकाः धिय एव धीसुसुप्तौ सुसंसारे इत्यन्वयमुक्त्वा व्यतिरेकं तद्व्यतिरेकमाह यस्मा
त्कारणात् सुप्तौ तदभावात् धीतत्वभावात् ॥ परमात्मनोऽस्मानि स्तृतीयार्थे षष्ठी सुखस्वरूपेण ॥ स्वस्वरूपमा
त्रेण विभाव्यते निश्चीयते न तु संसारित्वेनेति भावः ॥ सुप्तोत्थितस्तु सुखमहमस्वाप्समिति प्रत्यभिज्ञानुभ

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥ यस्मात्प्रसुप्तौ तदभावतः परः
सुखस्वरूपेण विभाव्यते हि नः ॥ ३९ ॥ अनाद्यविद्योद्भवबुद्धिबिंबितो जीवः प्रकाशोऽयमितीर्यते
चितः ॥ आत्माधियः साक्षितया पृथक्स्थितो बुद्ध्या परिच्छिन्नपरः स एव हि ॥ ४० ॥

वात्तदात्मस्वरूप

वितिश्रयोऽस्तीतितात्पर्यं ॥ ३९ ॥ पुनस्तत्त्वंपदार्थस्वरूपमाह अनादीति अनादिर्याविद्या ततउद्भवो यस्या बु
द्धेः अंतःकरणस्य तत्र विचिंतः प्रतिबिंबितोऽयश्चितः प्रकाशः स जीव इतीर्यते ॥ आत्मा परमात्मा धियः
साक्षितया धीधर्मसंगेनैव पृथक्स्थित अंतर्यामितया सर्वः जीवोऽहं ॥ सुखीत्यादिप्रकारेणांतःकरण
धर्माध्यासवान् ॥ परमात्मानुसाक्षितया सर्वत्र विद्यमानोऽपि न तथेति भावः अत एव बुद्ध्याः ॥ परिच्छिन्नपरः
बुद्धिलक्षणपरिच्छेदरहितः अत एव परः ॥ एवं च ज्ञानेन प्रतिबिंबाधारविलये प्रतिबिंबस्य विलयात् सजीवः
स एव परमात्मैव हि प्रसिद्धं सरस्यस्य चाहत्तिर्बोध्या ॥ ४० ॥

अथबुध्यात्मनोः। परस्पराध्यासवशात् परस्परधर्मभानमितिशंकायां पुनराह चिद्बिंवेति चिदात्मचेतसो रन्यो न्याध्यासवशात्परस्परतादात्म्यारोपाज्जडाजडत्वं प्रतीयते चेतसो दृश्यत्वांतानां ज्ञानत्वं जीवात्मनोजडत्वे प्रतीयते ॥ अतएव ज्ञानाश्रय आत्मेति चित्त एवता किंक व्यवहारः जीवात्मनि जडात्माकप्यते बुधैरिति स्मार्त व्यवहारस्य अध्यास हेतु चिदित्यादि चित्यादि । चिद्बिंव धयस्य स चिताभासः ॥ अक्षैः सहितः साक्षः सें द्रियः ॥ स चासावात्मा मनः ॥ धीरंतःकरणं ये षां प्रकृष्ट संगात् ॥ अति सन्निकर्षादध्यासइत्यर्थः तत्र दृष्टांतः ॥ अनलाक्तलोहवत् ॥ अग्नितप्तलोहपिंडवत् ॥ अग्निधर्मो दाहकत्वे लोहे लोह ॥ धर्मस्य वर्तुलत्वाघन

चिद्बिंबसाक्षात्मधियांप्रसंगतस्त्वेकत्रवासादनलाक्तलोहवत् ॥ अन्योन्यमध्यासवशात्प्रतीयतेजडाजडत्वंचचिदात्मचेतसोः ॥ ४१ ॥ गुरोःसकाशादपिवेदवाक्यतः संजाताविद्यानुभवोनिरीक्ष्यतां ॥ स्वात्मानमात्मस्थमुपाधिवर्जितंत्यजेदशेषंजडमात्मगोचरं ॥ ४२

त्वे भासते तत्र हेतुरेकत्रवासात् परस्पराविभागेनवृत्तिरित्यर्थः ॥ स्तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ४१ ॥ उक्तमेवार्थं सदृष्टांतं पुनराह ॥ गुरोरिति वेदवाक्यात इत्यनेन श्रवणं गुरोः ॥ सकाशादपि ततश्चाने नमननसुक्तं ताभ्यां संजातो विद्याज्ञानरूपस्यात्मनोनुभवो यस्य सः ॥ अनेन कृतनिदिध्यासन इत्यर्थः ते चिदानंदस्वरूपे स्वात्मानंदउपाधिवर्जितं अननुसंहितोपाधि धर्मं आत्मस्थं हृत्स्थं निरीक्ष्य अपरोक्षीकृ

ज्ञेये निरुपाधिकं स्वरूपं श्लोकद्वयेनाह प्रकाशेति अहं प्रकाशरूपः स्वप्रकाशः ॥ परप्रकाश्यो हि न प्रकाशरूपो
घटादिः अजो जन्मादिविकाररहितः अद्वयः सजातीयः द्वितीयरहितः ॥ असकृद्विभावः सकृदपि करेण भासकां
तरेण भासकांतरेण प्रकाशितः सकृद्विभातः न सकृद्विभातो ॥ सकृद्विभातः न तत्र सूर्यो भाति न चंद्रतारकमि
ति श्रुतेः न तद्भासयते सूर्यो न शशांको न पावक इति स्मृतेश्च अतीव निर्मलः मायाकृतावरणविक्षेपरहितः
विशुद्धविज्ञानघनः ॥ विशुद्धचिदेकारकैरसः ॥ निरामयः ॥ कर्तृत्वाभिमानरहितः ॥ संपूर्णदेशकालपरिच्छेदरही

प्रकाशरूपोहमजोहमद्वयोसकृद्विभातोहमतीवनिर्मलः ॥ विशुद्धविज्ञानघनो निरामयः सं
पूर्ण आनंदमयोहमक्रियः ॥ ४३ ॥ सदैवमुक्तोहमचिंत्यशक्तिमानतींद्रियज्ञानमविक्रियात्म
कः ॥ अनंतपारोहमहर्निशंबुधैर्विभावितो हं हृदिवेदवादिभिः ॥ ४४ ॥ ॥ छ ॥ छ ॥ छ ॥ छ ॥

नः ॥ आनंदमयः आनंदरूपः स्वार्थे मयट् ॥ अक्रियः परिणामहीनः ॥ ४३ ॥ सदैवेति ॥ अहं सदैव कालत्रयेपि
मुक्तः सर्वधर्मरहितः ॥ अचिंत्यशक्तिमान् यः परमात्मा अतींद्रियज्ञान इंद्रियातिरिक्तज्ञानरूपः ॥ यतो वाचो
निवर्त्तंते अप्राप्य मनसा सहेति श्रुतेः अविक्रियात्मको परिणामी ॥ अनंतपारः ॥ अंतः कालतः पारः परती
रं ताववियमानौ यस्य तेन देशकाल ॥ परिच्छेदहीनः ॥ ईदृशो यः ॥ परमात्मा बुधैर्हृदि अहर्निशं विभावितः

सोहमित्यर्थः ॥ ४४ ॥

एवंभावनायाः॥फलमाह॥एवमिति उक्तरित्या सदा आत्मानं॥अखंडितात्मना विषयानाकृष्टचित्तेन विचारमाणस्य
ध्यायतः॥धातूनामनेकार्थत्वात् चरमाण एव चारमाण स्वार्थेण विशुद्धभावना आलोकांतःकरणवृत्तिरु
देतीति शेषः सा चोदिता कारकैर्देहांतरप्रापककर्मभिः॥सहाविद्यामचिरेण शीघ्रमेव हन्यात॥यथोपासितं
सेवितं रसायनं रुजो हन्यात् तद्वत्॥४५॥तत्र ध्यानेतिकर्तव्यतामाह॥विविक्त इति निर्जनेदेशे॥आसीनो य
थोचितपद्मासनाद्युपविष्टः उपारतेंद्रियः॥निवृत्तव्यापारेंद्रियः तेन शमदमादिसंपन्नः॥विनिर्जितात्मा आ

एवं सदात्मानमखंडितात्मना विचारमाणस्य विशुद्धभावना हन्यादवि
द्यामचिरेण कारकैः रसायनं यद्वदुपासितं रुजः॥४५॥विविक्त आसीन
उपारतेंद्रियो विनिर्जितात्मा विमलांतराशयः॥विभावयेदेकमनन्य
साधनो विज्ञानदृक् केवल आत्मसंस्थितः॥४६॥ ॥०॥ ०॥०॥०॥

णयमादिभिर्जितांतः॥करणः अत एव विमलांतराशयो विशुद्धचित्तः॥विज्ञानदृक् विज्ञानेन एव दृक् मानं य
स्य सः दृष्टदृश्यमानरहितः॥अनेन निर्विकल्पकसमाधिरुक्तः॥अनन्यसाधनः तत्वज्ञानातिरिक्तमुक्तिसा
धनातित्वभ्रमरहितः केवलो संग॥आत्मसंस्थितः आत्मन्येव संस्थासमाप्तिः॥संजाता यस्य सः॥तेन क
दापि विषयांतरसंचारवर्जितः विभावयेत्॥ध्यायेत्॥ ४६॥ ॥ ॥ ॥ ॥॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

किंचपरेतत् भूतश्च विष्यवर्त्तमाने विश्वे परमात्मा दर्शनं भासको यस्य तत् तस्य भासा सर्वमिदं विभातीति श्रुतेः
तत्सर्वकारणे मायासन्निधानात् ॥ सर्वोपादानत्वेनाभिमते ॥ आत्मनि विलापयेत् ॥ उपादानसत्ताव्यतिरे
केण कार्यसत्तां न पश्येत् तत्रादृश्यस्य लक्षणमाह संपूर्णः ॥ अवाप्तसमस्तकामः तस्य काम्याभावात् ॥ चिदानं
दमयः तद्रूपोवतिष्ठते वाह्यमांतरंच दृश्यं न जानाति सर्वत्र ब्रह्मदर्शनादिति भावः ॥ ४७ ॥ समाधिसिद्धेः ॥ पूर्वं यत्क

विश्वं यदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥ पूर्णश्चिदानंदमयोवतिष्ठते न वे
द बाह्यं नैव च किंचिदांतरं ॥ ४७ ॥ पूर्वं समाधेरखिलं विचिंतयेदोंकारमात्रं सचराचरं जगत् ॥ तदे
व वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

र्त्तव्यं तदाह ॥ पूर्वमिति ॥ समाधेः सकलविषयव्यासंगनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः ॥ समाधिस्ततः ॥ पूर्वं अ
खिलं सचराचरं जगत् ॥ ॐकारमात्रं विचिंतयेत् ॥ ॐकारे मीयते नयेति मात्रा प्रमाणं बोधकत्वेन परिच्छे
दको यस्य तथा जानीयात् तदेव विवृणोति तदेवेति जगदेवेत्यर्थः ॥ प्रणवो वाचको विभाव्यते ॥ एतद्विप्रसि
द्धिमित्यर्थः इयं भावना ज्ञानवशादेव न बोधतः ॥ बोधो निर्विशेषब्रह्मसाक्षात्कारस्तदुत्तरं नेत्यर्थः तस्य सर्व
वृत्त्युपमर्दकत्वात् ॥ ४८ ॥

उक्तमर्थं विवृणोति ॥ अकारेति अकारसंज्ञस्तद्वाच्यः ॥ पुरुषो हि विश्वको विश्व एव विश्वकः ॥ विश्वकशब्देन
परिभाषितः अयं जाग्रत्साक्षी विराट् ततः स्वप्नसाक्षी तैजसस्तेन पदेन ॥ परिभाषितः ॥ लिंगदेहाभिमानी हिरण्य
गर्भ उकारक उकारस्तत्प्रतिपाद्य ईर्यते ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो मायोपाधिको मकारस्तद्वाच्यः
परिपठ्यते ऽखिलैर्वेदैः इयं भावना समाधिपूर्वं समाधेः ॥ पूर्वमेव न तत्वतः तत्वसाक्षात्कारे सति न भवे

अकारसंज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात् ॥ प्राज्ञो मकारः परिपठ्य
ते खिलैः ॥ समाधिपूर्वं न तु तत्वतो भवेत् ॥ ४९ ॥ विश्वं त्वकारे पुरुषं विलापयेदुकारमध्ये
बहुधा व्यवस्थितं ॥ ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्य चांतिमे ५० ॥

तु सर्वस्य ब्रह्मणि प्रविलयात् ॥ ४९ ॥ अथ विलापनप्रकारमाह द्वाभ्यां विश्वं त्विति उकारमध्ये बहुधा व्यव
स्थितं स्थूलदेहनिबंधनस्थूलभोगाभिमानेन स्थितं विश्वं पुरुषं तद्वाचकमकारं च विलापयेत् ॥ तु
श्वार्थे विलीनं भावयेत् ततः स्वेत संलिंगदेहाभिमानिनं ॥ पुरुषं तद्वाचकं प्रणवद्वितीयवर्णं उकारं
विलीनचिं स्वकं मकारे विलाप्य विलीनं भावयित्वा ॥ ५० ॥ ॥ ॥ ॥ ॥ ॥

ततस्तादृशं प्रकारं तत्कार्यं प्राज्ञं च कारणं त्वाभिमानिनं पुरुषं दृढात्मनि निर्विकल्पे परे विलापयेत् तथा भावये
त् ॥ ततः सोहं सर्वविलापाधिष्ठानं परं ब्रह्मेति विभावयेत् ॥ तद्विशिनष्टि सदा विमुक्तिमत् नित्यमुक्तं न च
ह ॥ पदार्थस्य रागद्वेषादिमलिनस्य कथं ब्रह्मत्वभावने त्याशंक्याह ॥ पदार्थं विशिनष्टि उपाधितो मुक्तः अत
एवामलः ॥ तथाभावने साधनं विज्ञानदृक् ॥ विज्ञानं निदिध्यासनं ब्रह्ममात्रप्रत्ययाविच्छेदरूपं दृक् तत्साक्षा
त्कारसाधनं यस्य सः ५१ एवं भावनावतो लक्षणमाह एवमिति उक्तप्रकारेण सदा जातापरमात्मनेकभा

प्रकारमप्यात्मनि निर्विकल्पे परे विलापयेत्प्राज्ञमपीह कारणं ॥ सोहं परं
ब्रह्म सदा विमुक्तिमद्विज्ञानदृग्मुक्तउपाधितोमलः ॥ ५१ ॥ एवं सदा जा
तपरात्मभावनः स्वानंदतुष्टः परिविस्मृताखिलः ॥ आस्ते स नित्यात्म
सुखप्रकाशकः साक्षाद्विमुक्तोचलवारिसिंधुवत् ॥ ५२ ॥ ० ॥

वना यस्य सः ॥ परि विस्मृतमखिलं पुत्रदेहादि येन सः ॥ अत एव स्वस्वरूपानंदेनैव तुष्टः ॥ न तु विषया
नंदेन तस्य परिणामे दुःखरूपात्ततो विरक्तत्वार्थः ॥ साक्षान्नित्यात्मसुखप्रकाशकः ॥ साक्षादुपाधिकृता
नस्वरूपभेदरहितत्वेन निरस्तमखंडितमात्मस्वरूपं यत्सुखं प्रकाशश्च तद्रूपः एवंरूपो विमुक्तो जीवन्मुक्तः
अचलं निश्चलं वारि यस्य तादृशसिंधुवदास्ते विषयसंबंधरूपतरंगरहित आस्ते इत्यर्थः ॥ ५२ ॥

ईदृशस्य मत्प्राप्तिर्भवत्येवेत्याह ॥ एवमिति उक्तप्रकारेण सदाभ्यस्तसमाधेर्योगिनः निवृत्तासर्वेषामिंद्रियाणां गोचराणि विषुपाशब्दादयो यतस्तस्य विनिर्जिता अशेषा रिपवः कामादयो येन तस्य तज्जयेन विषये छंतः करणप्रवृत्तिः सूचिता अत एव सर्वसत्वनित्यत्वपत्वबोधरूपत्वस्वतंत्रत्वनित्यमत्वपत्वानंतरूपाः षड्गुणा यस्य तादृश आत्मा ज्ञातो वशीकृतो येन तस्य सरूपो भवेयं एतेन मद्भक्तस्य योगीनो हे दृश्पोन तु भक्तिविमुखस्येति सूचितं ॥ ५३ ॥ एवंविधो जीवन्मुक्तः प्रारब्धवशेनाभिमानहीनः भोगानश्नंति ष्टेत् ततो

एवं सदाभ्यस्तसमाधियोगिनो निवृत्त सर्वेंद्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहं सदा
दृश्पो भवेयं जितषड्गुणात्मनः ॥ ५३ ॥ ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबं

धनः ॥ प्रारब्धमश्नन्नभिमानवर्जितो मय्येव साक्षात्प्रविलीयते ततः ॥ ५४ ॥ आदौ च मध्या
चत्तथैव चांततो भवं विदित्वा भयशोककारणं हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मा
नमथाखिलात्मनां ॥ ५५ ॥

मय्येव विलीयते मद्रूपो भवतीत्याह ॥ ध्यात्वैवमिति ॥ ५४ ॥ सर्वधर्मापेक्षया ऽयमेव धर्मोऽपापानीत्याह आ
दौ चेति भवं संसारं आदिमध्यावसानेषु सर्वथा भयशोकयोः ॥ कारणं विदित्वा तत्कारणीभूतं विधिवादैर्यजेतेत्यादिभिश्चोदितं बोधितं समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं
परमेश्वरं भजेत् यथा पतत्स्यान्नेनैनादौ दुःखं मध्येपालकृते तन्नाशे चान्ते राज्यादिकृतं यं श्रंतेनाशे शोकप्रपर्यवसा

मय्यभेदभावनायानामरूपाविभागेन मद्रूप एव भवतीत्यमुमर्थं सदृष्टांतमाहात्मनीति आत्मनि सर्वाधिष्ठानेम
पिइदं स्वस्वरूपं जीवमभेदेन विभावयन् पश्यति ष्टतीति शेषः ॥ तदा मयात्मना परमेश्वरेण भेदेन भवेति अभि
न्नो भवति तत्र दृष्टांतः यथा समुद्रेभविष्टं नद्यादिजलं समुद्र एव यथा क्षीरे णएवादि क्षीरे प्रक्षिप्तं पयः क्षीर
मेव यथा व्योम्नि महाकाशे घटाद्यवच्छिन्नाकाशो घटादि भंगे यथा च मर्भ्नस्त्रिकाद्यवच्छिन्नो वायुरनिले
महावायौ नामरूपाविभागेनैकी भवतीत्यर्थः ॥५६॥ एवमात्मतत्वज्ञस्य जगत्सत्यत्वभ्रमः स्वत एवापैतीत्याह इ

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयात्मना तदा । यथा जलं वारिनिधौ यथा पयः क्षीरे
वियद्व्योम्न्यनिले यथानिलः ॥५६॥ इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मु
निः निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेंदुभेदो दिशि दिग्भ्रमादयः ॥५७॥

॥ इत्थमिति हि यथार्थे लोकसं
स्थितोपि जीवन्मुक्तिदशायां प्रारब्धवशाल्लोकव्यवहारं कुर्वन्नपि जगन्मृषैवेति विभावयन्सम्यदि यदा द
त्थमीक्षेतै ऐकात्म्यं जानीयात् तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः तत्र हेतुः श्रुतियुक्तिमानतो निरा
कृतत्वात् । अनोन्यदार्त्तमित्यादि श्रुतिरूपा तज्जगन् मिथ्या दृश्यत्वात् शुक्तिरजतवदिति तदुपष्टंहितानुमानरू
पयुक्तिरूपान्मानतः प्रमाणतो निराकृतत्वात् तत्र दृष्टांतो यथेंदुभेदः ॥ एकत्व चंद्रद्वित्वभ्रमस्तदेकत्वज्ञानेन निवर्त्त
ते यथा च दिशि प्राच्यादौ अन्यदिक्त्वभ्रमः तोपि तत्तत्वज्ञानान्निवर्त्तते एवं भ्रमतः पुरुषस्य दिङ्मुभ्रमण भ्रमः

निकटवर्त्तिवृक्षादौ च भ्रमणभ्रमः तस्यैर्य
ज्ञानेन निवर्त्तते तद्वत् ॥५७॥

ए० अ० उ०
३२

ईदृशज्ञानेमदाराधनेमेवोपायइत्याह॥ यावदिति अखिलं जगत् मदात्मकं मदधिष्ठानकं मद्विवर्त्तभूतं यावन्न पश्ये
तावर्त्तत्रात्ययेश्रद्धालुः भगवदाराधनमेव च ज्ञानप्रापकमित्यत्र दृढविश्वासवान्॥ अतिशयेनोर्जिता वृद्धि
मतीभक्तिर्मयिभगवति पूज्यता बुद्धिरूपा चिन्हं लक्षणं यस्य सः तावन्मदाराधननिष्ठो भवेत् एवं हि तस्य हृदि
अहमहर्निशं दृश्यो भवामि ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहमिति स्मृतेः॥ ५८॥ स्वोक्तवचनजातस्य श्रु
तिसमत्वं कथयते तदालोचनमपि मदाराधनप्रतिबंधकदुरितध्वंसोपायइत्याह रहस्यमिति श्रुतिसारसं

यावन्न पश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत्॥ श्रद्धालुरत्यू
र्जितभक्तिलक्षणो यस्तस्य दृश्योहमहर्निशं हृदि॥ ५८॥ रहस्यमेतच्छ्रुतिसार
संग्रहं मया विनिश्चित्य तवोदितं प्रिय॥ यस्त्वे [damage] तदालोचयतीह बुद्धिमान्स
मुच्यते पातकराशिभिः क्षणात्॥ ५९॥ भ्रातर्यदीदं परिदृश्यते जगन्मायैव
सर्वं परिहृत्य चेतसा॥ मद्भावनाभावितशुद्धमानसः सुखी भवानंदमयो

यहत्वेनातिगोपनीयता अप्रमाणशंकाकलंकराहित्यं च सूचितं आलोचयति सम्यग्विचारयति॥ ५९॥ अथ
भगवानुक्तमेवार्थं संक्षेपेण दार्ढ्याय पुनराह॥ भ्रातरिति यदीति यदित्यर्थे यदिदं जगत्परिदृश्यते तत्सर्वं
मायैवेति ज्ञात्वा तेष्वेषः चेतसा सर्वं परिहृत्य तत्रौदासीन्यं कृत्वा मद्भावनया मदैक्यभावनया भावितं शुद्धं मान
सं यस्य तादृशः अस्ति इष्टं इत्युपदिश्य आशिषः माह निरामयः सन् सुखी भव सर्वदुःखनिवृत्त्येति भावः ततो तरंगा
नन्दमाह॥ आनंदमयो भव तद्रूपो भवेत्यर्थः॥ यद्यपि पूर्वं मानंदरूपत्वमस्त्येव तथापि तत्प्राप्तिः विस्मृ

ए० म०
३२

एवं रीत्या स्वोपासकस्य लोकपावनत्वमाह य इति कदा वा यदा कदाचिदित्यर्थः हृदा निर्मलेनांतःकरणेन यो मामगुणं प्राकृतसत्त्वरजस्तमोरूपगुणरहितं सच्चिदानंदरूपत्वात् अत एव गुणात्परं गुणद्रष्टृत्वात् परं मायातीतं यदि वा यद्वा गुणात्मकं सर्वज्ञत्वादिलोकोत्तरस्वभावरूपादिगुणव्याप्तामूर्त्तिर्यस्य तं दृश्यमानरूपं सेवते स द्विविधोप्युपासकः अहं मत्स्वरूप एव मामक इत्यर्थः वा प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रिय इत्युक्तेः॥ तादृशो भक्तः स्वपादस्थरेणुभिः स्पृशन् लोकत्रयमपि पुनाति॥ अज्ञानध्वांतनिरसनेन पवित्रीकरोतीति यथा रविः॥ स्वकरैर्जगद्वितिमिरीकरो

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकं॥ सोहं स्वपादांचितरेणुभिः स्पृशन् पुनाति लोकत्रितयं यथा रविः॥६१॥ विज्ञानमेतदखिलं श्रुतिसारमेकं वेदांतवेद्यचरणेन मयैव गीतं॥ यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः॥६२॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे पंचमः सर्गः॥५॥ श्रीमहादेव उवाच॥

५ श्रीरामगीतायां

॥ति तद्वत्॥६१॥ इदानीमेतदध्यायार्थालोचनासमर्थस्य पाठमात्रतोऽपि महत्फलमाह विज्ञानमिति विज्ञानं विज्ञानजनकं करणव्युत्पत्त्येति बोध्यं वेदांतैरुपनिषद्भिः वेद्यं चरणं जगज्जन्मादिलक्षणं कर्म यस्य तेन ननु पठनमात्रादेतादृशमहत्फलप्राप्तिः कथमित्याशंक्य भवत्येवेति सूचयंस्तत्र हेतुमाह मद्वचनेषु भक्तिर्विश्वासो यदीत्यर्थः गुरुवाक्यविश्वासस्यैव फलदायकत्वादिति भावः॥६२॥ इति श्रीमदध्यात्मरामायणटीकायामुत्तरकांडे पंचमः सर्गः॥५॥ ०॥ ०॥ ०॥ ०॥ ०॥

एकदेति लवणरक्षसः लक्ष्मणेनाम्नो भयादित्यर्थः ॥१॥ रामाल्लवणकृतभयरक्षणं कांक्षिणः ॥२॥ हे मुनिश्रेष्ठाः अहं किं भवत्कार्यं करवाणि मत्समीपे भवदागमनस्य च किं कारणं यदीयप्रीत्या सर्वदुःखनिवर्त्तनं समत

एकदा मुनयः सर्वे यमुनातीरवासिनः ॥ आजग्मू राघवं द्रष्टुं भयाल्लवणरक्षसः ॥१॥ कृत्वाग्रे तु मुनिश्रेष्ठं भार्गवं च्यवनं द्विजाः ॥ असंख्यातास्समायाता रामादभयकांक्षिणः ॥२॥ तान्पूजयित्वा परया भक्त्या रघुकुलोत्तमः ॥ उवाच मधुरं वाक्यं हर्षयन्मुनिमंडलं ॥३॥ करवाणि मुनिश्रेष्ठाः किं मागमनकारणं ॥ धन्योस्मि यदि यूयं मां प्रीत्या द्रष्टुमिहागताः ॥४॥ सुदुष्करं च यत्कार्यं भवतां तत्करोम्यहं ॥ आज्ञापयंतु मां सर्वे ब्राह्मणा दैवतं हि मे ॥५॥ तच्छ्रुत्वा सहसा हृष्टश्च्यवनो वाक्यमब्रवीत् ॥ मधुनाम महादैत्यः पुरा कृतयुगे प्रभो ॥६॥ आसीदतीव धर्मात्मा देवब्राह्मणपूजकः ॥ तस्य तुष्टो महादेवो ददौ शूलमनुत्तमं ॥७॥ प्राह चानेन यं हंसि स तु भस्मीभविष्यति ॥ रावणस्यानुजा भार्या तस्य कुंभीनसी श्रुता ॥८॥ तस्यां तु लवणो नाम राक्षसो भीमविक्रमः ॥ आसीद्दुरात्मा दुर्धर्षो देवब्राह्मणहिंसकः ॥९॥

बुध्या या प्रीतिस्तया यत्त्वं द्रष्टुमागतास्तद्धन्योस्मि ॥४॥५॥६॥ अनुत्तमं न विद्यते शत्रुवधे उत्तममधिकं यस्मात् तत् ॥७॥८॥ यतो दुरात्मा अतः सर्वैर्दुर्धर्षो दुःसहः ॥९॥

वो युष्माकं मा भीः भवत्विति शेषः॥१०॥ विगतज्वराः गतदुःखाः॥११॥ लवणं राक्षसमिति तस्य को वा हनिष्यतीत्य-
न्वयः॥ को वा ब्राह्मणेभ्यो अभयं दद्यात् दास्यतीत्यर्थः॥१२॥१४॥ वधाय च वधायेत्यर्थः हन्यां हनिष्यामी

पीडितास्तेन राजेंद्र वयं त्वां शरणं गताः॥ तच्छ्रुत्वा राघवो प्याह मा भीर्वो मुनिपुंगवाः॥१०॥ लवणं ना-
शयिष्यामि गच्छंतु विगतज्वराः॥ इत्युक्त्वा प्राह रामो पि भ्रातॄन्को वा हनिष्यति॥११॥ लवणं राक्षसं
दद्याद्ब्राह्मणेभ्यो ऽभयं महत्॥ तच्छ्रुत्वा प्रांजलिः प्राह भरतो राघवाय वै॥१२॥ अहमेव हनिष्यामि
देवाज्ञापय मां प्रभो॥ ततो रामं नमस्कृत्य शत्रुघ्नो वाक्यमब्रवीत्॥१३॥ लक्ष्मणेन महत्कार्यं कृ-
तं राघव संयुगे॥ नंदिग्रामे महाबुद्धिर्भरतो दुःखमन्वभूत्॥१४॥ अहमेव गमिष्यामि लवणस्य
वधाय च॥ त्वत्प्रसादाद्रघुश्रेष्ठ हन्यां तं राक्षसं युधि॥१५॥ तच्छ्रुत्वा सोंकमारोप्य शत्रुघ्नं शत्रु-
सूदनः॥ प्राहाद्यैवाभिषेक्ष्यामि मथुराराज्यकारणात्॥१६॥ आनाय्य च सुसंभारान् लक्ष्मणे-
नाभिषेचने॥ अनिच्छंतमपि स्नेहादभिषेकमकारयत्॥१७॥ दत्वा तस्मै शरं दिव्यं रामः शत्रुघ्न-
मब्रवीत्॥ अनेन जहि बाणेन लवणं लोककंटकं॥१८॥ स तु संपूज्य तच्छूलं गेहे गच्छति का-
ननं॥ भक्षणार्थं तु जंतूनां नानाप्राणिवधाय च॥१९॥ त्यर्थः॥१५॥१६॥ अभिषेचने अभिषेचन-
निमित्तं विषयसत्सम्पादनमर्थः॥ फलति अकारयत् वसिष्ठादिभिरिति शेषः॥१७॥१८॥ गेहे संपूज्य स्थापयित्वा

रंगा छत्तीसर्गः॥२८॥

रा० उ० अ०
३४

स तु यावद्वनचरो भवेत् स यदि सदनं नायाति तावदेवेत्यन्वयः ॥ २० ॥ कुर्युद्धं स त्वयो ऽस्य ते युद्धं कुर्वीतेति शेषः ॥ २१ ॥ २२ ॥
त्वमग्रे प्रथममेकाकी एवं राक्षससंसाधयनाशाय पश्चाद्ध्वोत्तरसेना त्वत्समीपमागमिष्यतीत्यर्थः ॥ २३ ॥ २४ ॥ २५ ॥ स्फी

स तु नायाति सदनं यावद्वनचरो भवेत् ॥ तावदेव पुरद्वारि तिष्ठ त्वं धृतकार्मुकः ॥ २० ॥ यो ऽस्य ते सतताकुर्युद्धं तदा वध्यो भविष्यति ॥ तं हत्वा लवणं क्रूरं तद्वनं मधुसंज्ञितम् ॥ २१ ॥ निवेश्य नगरं तत्र तिष्ठ त्वं मेऽनुशासनात् ॥ अश्वानां पंचसाहस्रं रथानां च तदर्धकम् ॥ २२ ॥ गजानां षट्शतानीह पत्तीनामयुतत्रयम् ॥ आगमिष्यति पश्चात्त्वमनेसाधय राक्षसम् ॥ २३ ॥ इत्युक्त्वा मूर्ध्न्यवघ्राय प्रेषयामास राघवः ॥ शत्रुघ्नं मुनिभिः सार्धमाशीर्भिरभिनंद्य च ॥ २४ ॥ शत्रुघ्नोपि तथा चक्रे यथा रामेण चोदितः ॥ हत्वा मधुसुतं युद्धे मथुरामकरोत्पुरीम् ॥ २५ ॥ स्फीतां जनपदां चक्रे मथुरां दानमानतः ॥ सीतापि सुषुवे पुत्रौ द्वौ वाल्मीकेरथाश्रमे ॥ २६ ॥ मुनिस्तयोर्नाम चक्रे कुशो ज्येष्ठो ऽनुजो लवः ॥ क्रमेण विद्यासंपन्नौ सीतापुत्रौ बभूवतुः ॥ २७ ॥ उपनीतौ च मुनिना वेदाध्यापनतत्परौ ॥ वेदोपबृंहणार्थाय तावग्राहयत प्रभुः ॥ २८ ॥

१ तां सस्यवृद्धां जनपदां जनवासस्थानभूतां पूर्ववत्तु वनत्वाभावः तथा ॥ २६ ॥ २७ ॥ २८ ॥ क्रमेमे वाह उपनीतौ चेति यत्सु एशांकरेण पार्वत्यै प्रोक्तं रामायणं तद्वेदोपबृंहणार्थाय वेदतात्पर्यार्थज्ञानमिति मत्वा ग्राहयत् शब्दतो ऽर्थतश्च बोधितवानित्यर्थः ॥ २९ ॥

९ कृत्स्नं रामायणं प्राह काव्यं बालकयोर्मुनिः ॥ २९ ॥ शंकरेण पुरा प्रोक्तं पार्वत्यै पुरहारिणा ॥

रा० म०
३४

तंत्रीशब्द् तालाभ्यां समायुक्तौ अत्र वैषम्ये एण युक्तौ यथा तयोर्वैषम्यं न भवति तथा गायंतौ चेरतुः तंत्रीलयेति
पाठे तंत्र्यालयो मूर्छना तत्र समायुक्तौ अत्यंत निपुणौ ॥३०॥३१॥ भूर्लोके गंधर्व किंनरमध्ये नेदृशाः देवालये
स्वर्गे देवेषु न पाताले नागेषु च अथवा ब्रह्मलोकेपि न दृशो गायकः ॥ नाज्ञायी लक्ष्ये व विवरणं नादर्शित

कुमारौ स्वरसंपन्नौ सुंदरावश्विनाविव ॥ तंत्रीतालसमायुक्तौ गायंतौ चेरतुर्वने ॥३०॥ तत्र तत्र
मुनीनां तौ समाजेसु रूपिणौ ॥ गायंतावभितो दृष्ट्वा विस्मिता मुनयोब्रुवन् ॥३१॥ गंधर्वैर्विहगैः कि
न्नरेर्षु विवा देवेषु देवालये ॥ पाताले षथवा चतुर्मुखगृहे लोकेषु सर्वेषु च ॥ अस्माभिश्चिर
जीवि भिश्चिरतरं दृष्टा दिशः सर्वतो नाज्ञायी दृशगीतवाद्यगरिमा नादर्शिना श्राविच ॥३२॥ ए
वं स्तुवद्भिरखिलैर्मुनिभिः प्रतिवासरं ॥ आसाते सुखमेकांते वाल्मीकेराश्रमे चिरं ॥३३॥ अ
थ एमोश्वमेधादीश्चकार बहुदक्षिणान् ॥ यज्ञान्स्वर्णमयीं सीतां विधाय विपुलद्युतिः ॥३४॥
तस्मिन्वितानेऋषयः सर्वे राजर्षयस्तथा ॥ ब्राह्मणाः क्षत्रिया वैश्याः समाजग्मुर्दिदृक्षवः ॥३५॥
वाल्मीकिरपि संगृह्य गायंतौ तौ कुशीलवौ ॥ जगाम ऋषिवाटस्य समीपं मुनिपुंगवः ॥३६॥

साक्षारीरदृष्टं गानं स्वकर्णाभ्यां न श्रुतमित्यर्थः ना श्राविकर्णीपकर्णिकया ऽमुकदेशे ईदृशो पि शिक्षि
गाता स्तीति न श्रुतमपीति न श्रुतमपीत्यर्थः ॥ ३२ ॥ स्तुवद्भिर्मुनिभिः सहेते शेषः ॥३३॥३४॥ विताने यज्ञे

समाद्दिदृक्षवः यज्ञमिति शेषः ॥३५॥ संग
ह्य संगृह्य होता ऋषिवाटस्य ऋषिवासस्या
नस्य ॥३६॥

३ भु

रा० अ० उ०
३५

ज्ञानशास्त्रं तुल ज्ञानकारणं शास्त्रं इतः परं मुनिवियोगकालस्य सन्निहितत्वादतिगुह्यं तत्वं प्रश्नं कुरु इति भावः
३७ भवतः सकाशादिति शेषः संसृतिबंधः संसाररूपो बंधः ॥३८॥३९॥ तच्च मत्तः श्रुत्वा यथा मयोदितं कथि
तं भविष्यति ॥४०॥ तथैवाचरेत्यन्वयः ॥ अदेहस्य वस्तुतो देहसंबंधहीनस्यापि देहो महागेहमेव यथा गृह
स्वामिनो गृहस्य तादात्म्यं तथा यस्य चिदात्मनो देहे नापि न तदिति भावः ॥४१॥ तस्य चिदात्मनो स्मिन्देहे

तत्रैकांते स्थितं शांतं समाधिविरमे मुनिं ॥ कुशः पप्रच्छ वाल्मीकिं ज्ञान एकस्मिंक
पांतरे ॥३७॥ भगवन्श्रोतुमिच्छामि संक्षेपाद्भवतोऽखिलं देहिनः संसृतिबंधः
कथमुत्पद्यते दृढः ॥३८॥ कथं विमुच्यते देही दृढबंधाद्भवाभिधात् ॥ वक्तुमर्हसि
सर्वज्ञ मह्यं शिष्याय ते मुने ॥३९॥ वाल्मीकिरुवाच ॥ शृणु वक्ष्यामि ते सर्वं सं
क्षेपाद्बंधमोक्षयोः ॥ स्वरूपं साधनं चापि मत्तः श्रुत्वा यथोदितं ॥४०॥ तथैवाच
रन्नंते जीवन्मुक्तो भविष्यसि ॥ देह एव महागेहमदेहस्य चिदात्मनः ॥४१॥ तस्याहं
कार एवास्मिन्मंत्रीति तेनैव कल्पितः ॥ देहगेहाभिमानं स्वं समारोप्य चिदात्मनि ॥४२॥ तेन
तादात्म्यमापन्नः स्वचेष्टितमशेषतः ॥ विदधाति चिदानंदे तद्वासितवपुः स्वयं ॥४३॥

अहंकार एव मंत्री स चाहंकारस्तेनैव कल्पितः तत्सांनिध्येन मायायास्तद्रूपः परिणाम इत्यतस्तेन कल्पित
इत्युक्तं सोऽहंकारः स्वं स्वीयं देहरूपं गेहं विषयमहं ममेत्याकारं वाभिमानं चिदात्मनि आरोप्य ॥४२॥
तेन चिदात्मना तादात्म्यमभेदमापन्नोऽयं तोतः स्वचेष्टितं चिदानंदे विदधाति नतु जडस्याहंकारस्य कर्तृत्वं चेष्टितं

रा० म०
३५

तेनाह कारेणे संकल्पितोयमेव संकल्पात्करोति ति संकल्पविषयी कृतः यद्वा स्वीयसंकल्पेनैव तदा कृतो
ऽसंतसन्निकर्षेण तदात्मापन्नत्वात् यथा भार्याविशिष्ट एवं गृहस्थस्य भार्येति च व्यवहारस्तद्वदयं
व्यवहारो बोध्यः तदीयसंकल्परूपनिगडेनाबद्धो बद्धः संकल्पयति कामयते ॥४४॥ तानि कामयन्
तल्लाभे लब्धनाशे च शोचति त्रयः तमः सत्वरजोरूपी ॥४५॥ तदेवाह तमइत्यादि एत एव जगतस्थि
तेः कारणं तेषां कार्यविशेषमाह ॥ तमोरूपादिति तमोरूपात् तमोगुणप्राधान्येन कृता संकल्पा
तेन संकल्पितो देही संकल्पनिगडावृतः पुत्रदारगृहादीनि संकल्पयति चानिशं ॥४४॥
संकल्पयन्स्वयं देही परिशोचति सर्वदा ॥ त्रयस्तस्याहमो देहा अधमोत्तममध्यमाः ॥४५॥
तमः सत्वरजः संज्ञा जगतः कारणं स्थितेः ॥ तमोरूपाद्धि संकल्पान्नित्यं तामसचेष्टया ॥४६॥
अत्यंतं तामसो भूत्वा क्रिमिकीटत्वमाप्नुयात् ॥ सत्वरूपो हि संकल्पो धर्मज्ञानपराय
णः ॥४७॥ अदूरमोक्षसाम्राज्यः सुखरूपो हि तिष्ठति ॥ रजोरूपो हि संकल्पो लोके सव्यव
हारवान् ॥४८॥ परितिष्ठति संसारे पुत्रदारानुरंजितः ॥ त्रिविधं तु परित्यज्य रूपमेतन्म
दिस्वर्ग्यः वृत्तिमतोर भेदात् तमोरूपादि मुक्तिकारणानुरूपत्वा कार्यस्य तत्कृतचेष्टायास्तामसत्वं
४६॥ एवं सत्वरूपइत्यादिना रजोयंत कार्यं धर्मेत्यादि तस्यायं संकल्पः सधर्मादिविशिष्टो भवति
४७॥ मोक्षोप्यनयैव दशायां प्राप्य इत्याह दूरेति अत एव सपुरुषः सुखस्वरूपस्तिष्ठतीति हि [illegible] प्रसिद्धं
यस्य रजोरूपः संकल्पः सलोके व्यवहारवान् ॥४८॥ तत्तद्व्यवहारयुतः पुत्रदारानुरंजीतः संसारे एज

सपरंपदप्राप्नोति सब्वरूप संकल्पस्यहि क्रमेण सर्वसंकल्पनाशाद्धारार रमोसलंप्राप्नुतंवो ध्ये आत्मपरिक्षये अ
त्मात्मासंकल्पः अतस्त्वं हृष्टीः सर्वेंद्रियज्ञानानि परिसत्स्य मनसैवमनो नियम्य विषयेभ्योनिवर्त्य ॥५०॥ बाह्येंद्रि
यविषयसहितो यआभ्यंतरेंद्रियविषयो र्थस्तस्य तद्विषयस्य संकल्पस्य क्षयंकुरु संकल्पंत्वते त्यर्थः॥ अन्यो
पायेनन सर्वथा सुखप्राप्तिरित्याह यदीति ॥५१॥ ता दृशतपः॥ पूर्वकं पाताला द्यन्ततपलोकस्य स्यापिनवसं

संकल्पः परमाप्नोति परमात्मपरिक्षये ॥ हृष्टीः सर्वाः परित्यज्य नियम्य मनसामनः ॥५०॥
सबाह्याभ्यंतरार्थस्य संकल्पस्य क्षयंकुरु ॥ यदिवर्षसहस्राणि तपश्चरसि दारुणं ॥५१॥ पा
तालस्यस्य भूस्यस्य स्वर्गस्यस्यापि तेनघ ॥ नान्यः कश्चिदुपायोस्ति संकल्पोपशमादृते ॥५२
अनाबाधेविकारेस्वे सुखे परमपावने ॥ संकल्पोपशमेयत्नं पौरुषेणपरं कुरु ॥५३॥ संकल्पतं
तौनिखिलाभावाः प्रोक्ताः किलानघ ॥ छिन्नेतंतौ नजानीमः क्वयांति विभवाः पराः ॥५४॥
निःसंकल्पोयथाप्राप्तव्यवहारपरोभव ॥ क्षयेसंकल्पजालस्य जीवोब्रह्मत्वमाप्नुयात् ॥५५॥

कल्पोपशमादृते तं विना ॥५२॥ अनाबाधे दुःखासंमिश्रे अविकारे विषयसंबंधं विनैवप्राप्ये परमपावने
स्वात्मरूपेसुखे तत्प्राप्तिनिमित्तं नकश्चिदुपायो स्तीत्यर्थः॥ तस्मात्तदुपशमेयत्नंकुरु ॥५३॥ संकल्पस्यैव सर्वा
धारत्वात्तन्नाशे एव सर्वविषयनिवृत्तिरित्याहुः॥ संकल्पतंतावितिविभवाः विशिष्टोभवः संसारो येभ्यस्ता
दृशास्ते पराभवाः स्तेक्वयांति इतिनजानीमः॥ सर्वथानश्यंत्येवेतिभावः ॥५४॥ ॥ ॥ ॥

तस्मान्निःसंकल्पो सक्तो छो यथा प्राप्तं व्यवहारं कुर्वित्यर्थः संकल्पक्षयफलमाह क्षयेति ५५ प्रसभं हठेन विक
ल्पजालं त्यक्त्वा अधिगतः परमार्थो ब्रह्मतत्त्वं येन तथाभूतः सन्नुपेत्य प्राप्य तत् द्वितीयं पदं अधिगमय प्राप्नुहि वित
तसुखायानुछेघ सुखापत्तद्यैति । ८ दिध्यासनमुपदिशति सुषुप्तकालिकचित्तवृत्तिर्यस्य तादृशो भव सकल
विषयरहितचित्तवृत्तिरेव ब्रह्माकाराचित्तवृत्तिरिति भावः ॥ ५७ ॥ इति श्रीमदध्यात्मरामायणस्य टीका या उत्त

अधिगतपरमार्थतामुपेत्य प्रसभमपास्य विकल्पजालमुच्चैः । अधिगमय पदं तद्द्वितीयं वि
ततसुखाय सुषुप्तचित्तवृत्तिः ॥ ५६ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकां
डे षष्ठः सर्गः ॥ ६ ॥ वाल्मीकिना बोधितो सौ कुशः सघोगतभ्रमः । अंतर्मुक्तो बहिः सर्वमनुकु
र्वन्न चचार सः ॥ १ ॥ वाल्मीकिरपि तौ प्राह सीतापुत्रौ महाधियौ । तत्र तत्र च गायेतौ पुरे वीथि
षु सर्वतः ॥ २ ॥ रामस्याग्रे प्रगायेतां शुश्रूषुर्यदि राघवः । नग्राह्यं वै सुवर्णाद्यं तदा यदि किंचिदर्प
दास्यति ॥ ३ ॥ इति तौ चोदितौ तत्र गायमानौ विचेरतुः । यथोक्तं ऋषिणा पूर्वं तत्र तत्राभ्यगायतां ॥ ४
तां सघुश्रावकाकुत्स्थः पूर्वचर्यां ततस्ततः । अपूर्वपाठजातिं च गेयेन समभिष्टुतां ॥ ५ ॥ ॥ ०॥

रकांडे षष्ठः सर्गः ॥ ६ ॥ वाल्मीकिनेति सहरूपदेशात् कुशस्योत्तमाधिकारित्वाच्च तत्कालमेव निदिध्यासनांतसाध
नसंपदिति भावः । स्त्यकरोतित्यनुकुर्वन्निवतत् तत्रास्याभावादिति भावः ॥ १ ॥ यदि किंचिद्राघवो धनं दास्यति तत्र
ग्राह्यं ॥ ३ ॥ यथोक्तं यथाशिक्षितं ॥ ४ ॥ अपूर्वपाठजातिं अपूर्वपठनारीतिं गेयेन गानेन न्यासं ॥ ५ ॥ ॥ ७ ॥ ७ ॥

रा० अ० उ०
३७

दि॥ शब्दविदः व्याकरणविदः॥ ७॥ संभवेशयत् अन्तर्भावयत् आर्षः॥ ८॥ रामोदारकौ च दृष्ट्वा विस्मितास्ते तो निमिषेण

बालयो राघवः श्रुत्वा कौतूहलमुपेयिवान्॥ अथ कर्मांतरे राजा समाहूय महामुनीन्॥ ६॥ राज्ञश्चैव नरव्याघ्रः पंडितांश्चैव नैगमान्॥ पौराणिकान् शब्दविदो ये च वृद्धा द्विजातयः॥ ७॥ एतान्सर्वान् समाहूय गायकौ संभवेशयत्॥ ते सर्वे हृष्टमनसो राजानो ब्राह्मणादयः॥ ८॥ रामं तौ दारकौ दृष्ट्वा विस्मिता ह्यनिमेषणाः॥ अवोचन् सर्व एवैते परस्परमथागताः॥ ९॥ इमौ रामस्य सदृशौ बिंबाद्बिंबमिवोदितौ॥ जटिलौ यदि न स्यातां न च वल्कलधारिणौ॥ १०॥ विशेषं नाधिगच्छामो राघवस्यानयोस्तदा॥ एवं संवदतां तेषां विस्मितानां परस्परं॥ ११॥ उपचक्रमतुर्गातुं तावुभौ मुनिदारकौ॥ ततः प्रवृत्तं मधुरं गांधर्वमतिमानुषं॥ १२॥ श्रुत्वा तन्मधुरं गीतमपराह्णे रघूत्तमः॥ उवाच भरतं चाभ्यां दीयतां मधु तं वसु॥ १३॥ दीयमानं सुवर्णं तु न तज्जगृहतुस्तदा। किमनेन सुवर्णेन राजन्नौ वन्यभोजनौ॥ १४॥ इति संसत्सु संदत्तं जगृतुर्मुनिसंनिधिं॥ एवं श्रुत्वा तु चरितं रामः स्वस्यैव विस्मितः॥ १५॥ ज्ञात्वा सीताकुमारौ तौ शत्रुघ्नं चेदमब्रवीत्॥ हनुमंतं सुषेणं च विभीषणमथांगदं॥ १६॥ भगवंतं महात्मानं वाल्मीकिं मुनिसत्तमं॥ आनयध्वं मुनिवरं ससीतं देवसंमितं॥ १७॥

अपश्यामिति शेषः॥ ९॥ बिंबं प्रतिबिंबं॥ १०॥ ११॥ अतिमानुषं मनुष्यलोकीयगानमतिक्रांतं॥ १२॥ १३॥ नो आवां नवभोजनौ स्वर्णभक्षकः॥ १५॥ १६॥ १७॥ १८॥

२८
राम०
३७

प्रत्ययं सर्वजनस्य शुद्धत्वनिश्चयोत्पादकं शपथमित्यन्वयः॥१८॥ सी।तामिति स्पष्टान्वयि॥१९॥२०॥ राघवस्यापि सविधे त

अस्यास्तु पर्षदो मध्ये प्रत्ययं जनकात्मजा॥ करोतु शपथं सर्वे जानंतु गतकल्मषां॥१८॥ सीतां तद्व
चनं श्रुत्वा गताः सर्वेति विस्मिताः॥ ऊचुर्यथोक्तं रामेण वाल्मीकिं रामपार्षदाः॥१९॥ रामस्य हृद्गतं स
र्वं ज्ञात्वा वाल्मीकिरब्रवीत्॥ श्वः करिष्यति वै सीता शपथं जनसंसदि॥२०॥ प्रोषितां परमं देवं पति
रेव नसंशयः॥ तच्छ्रुत्वा सह सांगत्वा सर्वं प्रोचुर्मुनेर्वचः॥२१॥ राघवस्यापि रामोपि श्रुत्वा मुनिवच
स्तथा॥ राजानो मुनयः सर्वे शृणुध्वमिति चाब्रवीत्॥२२॥ सीतायाः शपथं लोका विजानंतु शुभा
शुभं॥ इत्युक्ता राघवेण पल्लोकाः सर्वे दिदृक्षवः॥२३॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चै
व महर्षयः॥ वानराश्च समाजग्मुः कौतूहलसमन्विताः॥२४॥ ततो मुनिवरस्तूर्णं ससीतः
समुपागमत्॥ अग्रतस्तमृषिं कृत्वा प्रांजली किंचिदवाङ्मुखी॥२५॥ कृतांजलिर्बाष्पकंठा सीता
यज्ञविवेशतं॥ दृष्ट्वा लक्ष्मीमिवायांतीं ब्रह्माणमनुयायिनीं॥२६॥ वाल्मीकेः पृष्ठतः सीतां सा
धुवादो महानभूत्॥ तदा मध्ये जनौघस्य प्रविश्य मुनिपुंगवः॥२७॥ सीतासहायो वाल्मीकिरिति
प्राह च राघवं॥ इयं दाशरथे सीता सुव्रता धर्मचारिणी॥२८॥

॥ इदं च ऊचुरित्यन्वयः राजानो मुनय इति संबो
धने॥२२॥ सीतायाः शपथं दृष्ट्वा तस्याः शुभाशुभं धर्माधर्मरूपं विजानंतु निर्णयंतु॥२३॥२४॥ बाष्पकंठसेव॥२६॥

अपापाऽपि लोकापवादभीत्या त्यक्ता ॥२९॥
सा सीता प्रत्ययं विश्वासजनकं शपथं अत्रस्थाने कथेरति करुणरसाक्रान्तचित्त तया इमावपि इति त्यपौनरुक्त्यमदो
षाय ॥३०॥ तच्चाहो भगवान् वाल्मीकिः स्वधर्मं शमयैः सीताया अदुष्टत्वं ख्यापयति प्रचेतस इत्यादिना ॥३१॥ यथा य

अपापा पाते पुरा त्यक्ता मम आश्रमसमीपतः ॥ लोकापवादभीतेन त्वया राम महावने ॥२९॥ प्रत्ययं दा
स्यते सीता तदनुज्ञातुमर्हसि ॥ इमौ तु सीतातनयौ इमौ यमलजातकौ ॥३०॥ सुतौ तु तव दुर्धर्षौ
तथ्यमेतद्ब्रवीमि ते ॥ प्रचेतसोऽहं दशमः पुत्रो रघुकुलोद्वह ॥३१॥ अनृतं न स्मराम्युक्तं यथेमौ
तव पुत्रकौ ॥ बहून्वर्षगणान्सम्यक् तपश्चर्या मया कृता ॥३२॥ नोपाश्नीयां फलं तस्या दुष्टेयं य
दि मैथिली ॥ वाल्मीकिनैवमुक्तस्तु राघवः प्रत्यभाषत ॥३३॥ एवमेतन्महाप्राज्ञ यथा वदसि
सुव्रत ॥ प्रत्ययो जनितो मह्यं तव वाक्यैरकिल्बिषैः ॥३४॥ लंकायामपि दत्तो मे वैदेह्या प्रत्ययो म
हान् ॥ देवानां पुरतस्तेन मंदिरं संप्रवेशिता ॥३५॥ सेयं लोकभयाद्ब्रह्मन् अपापापि सती पुरा ॥
सीता मया परित्यक्ता भवान् तत्क्षन्तुमर्हसि ॥३६॥ ममैव जातौ जानामि पुत्रावेतौ कुशीलवौ ॥
शुद्धायां जगतीमध्ये सीतायां प्रीतिरस्तु मे ॥३७॥

यावदनृतमुक्तं न स्मरामि तथा इमौ तव पुत्रकाविति वाक्यमपि स समेवेत्यर्थः ॥३२॥३३॥ प्रत्ययो विश्वासः ॥३४॥ महा
न्प्रत्ययः प्रत्ययजनकः शपथोऽग्निप्रवेशरूपः ॥३५॥ लोकभयात् लोककृततदुर्वादभयात् ॥३६॥ जगतीमध्ये तद्दृष्टि
लोकमध्ये शुद्धायां शपथेन सर्वलोकज्ञानशुद्धायां ॥३७॥

३८॥३९॥ विवरं प्रवेशाय च्छिद्ररूपं मार्गं ॥४०॥ महाद्भुतमत्याश्चर्यं दिव्यसिंहासनं प्रादुरासीत् ॥४१॥ सर्वाश्च र्यं च दिव्यसोपपादकं रं विभ्रममिति ॥४२॥ दोर्भ्यां गृहीत्वा स्वागतमिति तामुवाचापैनामासने संन्यवेशयत् ॥४३॥ साधुवादश्च आसीदिति शेषः ॥४४॥ बहुधा वाचः बहुप्रकारं वाचः सीते वै वं कर्तुमर्हा इति राघवो

देवाः सर्वे परिज्ञाय रामाभिप्रायमुत्सुकाः ॥ ब्रह्माणमग्रतः कृत्वा समाजग्मुः सहस्रशः ॥३७॥ प्रजाः समागमन् हृष्टाः सीता कौशेयवासिनी ॥ उदङ्मुखी ह्यधोदृष्टिः प्रांजलिर्वाक्यमब्रवीत् ॥३९॥ रामादन्यं यथाहं वै मनसापि न चिंतये ॥ तथा मे धरणी देवी विवरं दातुमर्हति ॥४०॥ तथा शपंत्याः सीतायाः प्रादुरासीन्महाद्भुतं ॥ भूतलाद्दिव्यमत्यर्थं सिंहासनमनुत्तमं ॥४१॥ नागेंद्रैर्ध्रियमाणं च दिव्यदेहैरविभ्रमं ॥ भूर्देवी जानकीं दोर्भ्यां गृहीत्वा स्नेहसंयुता ॥४२॥ स्वागतं तामुवाचैनामासने संन्यवेशयत् ॥ सिंहासनस्था वैदेही प्रविशंती रसातलं ॥४३॥ निरंतरा पुष्पवृष्टिर्दिव्या सीतामवाकिरत् ॥ साधुवादश्च सुमहान् देवानां परमाद्भुतः ॥४४॥ ऊचुश्च बहुधा वाचो अंतरिक्षगताः सुराः ॥ अंतरिक्षे च सर्वे स्थावरजंगमाः ॥४५॥ वानराश्च महाकायाः सीताशपथकारणात् ॥ केचिच्चिंतापरास्तस्थुः केचिद्ध्यानपरायणाः ॥४६॥

॥ गृहीतशपथोपि पुनः शपथ ग्रहणे प्रवृत्तत्वादित्येवं बहुप्रकारं वाचः ॥४५॥ सीताशपथकारणात् बहुधा वाचं ऊचुरित्यनुकर्षः तस्थुश्चिं तापराः क्व सीता गमिष्यतीत्यादि चिंतायुक्ताः ॥ ध्यानपरायणाः ॥ भूप्रवेशकालिक सीतारूपस्य ध्यानप

८भूमौच

रामा॰ ३८

रामंनिरीक्ष्यंतः किंकरिष्यतीत्यावेघंसीतां निरीक्षतः कथंगच्छत्येवेसाघ्रोवं प्रकारेण अचेतनमासीदितिशेषः॥४७
भविष्यतः कार्यस्यगौरवंनिश्चयंज्ञात्वैवज्ञात्वापि॥४८॥ अजानन्निवशुशोच लोकव्यवहारानुसारेणेत्यर्थः
वोधितः भाविनोदुःपरिहरत्वादिकथाभिः कृतदुःखापनयनः॥४९॥ ऋत्विजोपदृत्यत्रतान्विससर्जेत्यनुक

केचिद्रामंनिरीक्ष्यंतः केचित्सीतामचेतसः॥ मुहूर्तमात्रंतत्सर्वंतूष्णींभूतमचेतनं॥४७॥
सीताप्रवेशनंदृष्ट्वा सर्वंसंमोहितंजगत्॥ रामस्तुसर्वज्ञात्वैवभविष्यत्कार्यगौरवं॥४८॥ अ
जानन्निवदुःखेनशुशोचजनकात्मजां॥ ब्रह्मणाऋषिभिःसार्धंबोधितोरघुनंदनः॥४९॥
प्रतिबुद्धस्ततस्त्वाब्रकारानंतराः क्रियाः॥ विससर्जऋषीन्सर्वानृत्विजोयेसमागताः॥५०
तान्सर्वान्धनरत्नाद्यैस्तोषयामासभूरिशः॥ उपादायकुमारौतौअयोध्यामगमत्प्रभुः॥
॥५१॥ ततःप्रभृतिनिःस्पृहोरामःसर्वभोगेषुसर्वदा॥ आत्मचिंतापरोनित्यंएकांतेसमुपस्थितः॥
॥५२॥ एकांतेध्याननिरतेएकदारघवेसति॥ ज्ञात्वानारायणंसाक्षात्कौसल्याप्रियवादि
नी॥५३॥ भक्त्यागतमसल्लंतंप्रणताप्राहहृष्टधीः॥ रामत्वंजगतामादिरादिमध्यांतवर्जितः॥

र्थः॥५०॥ तान्नृत्विजःप्रभृतीन्॥५१॥ एकांतेसमुपस्थितः तत्रैवस्थितः आसीत्॥५२॥ ध्याननिरतेराघवे
सतीसत्यर्थः रामंतच्चरित्रैर्ऋषिवाक्यैश्चतत्स्वरूपावगमान्नारायणंज्ञात्वा॥५३॥ प्रणतान्नारायणेपमिति

बुध्याआदिः कारणंयस्यवोरविनाया रहित
सिद्धभावाद्वैकवामप्रवर्जितः॥५४॥

सर्वेषांपरमउत्कृष्टआत्मा अंतर्यामि विधयाप्रेरकत्वात् परेनंदः हिरण्यगर्भानंदादपि दुर्लक्ष्योयआनंदस्तद्रूपः
पूर्णःपुरुषः प्राप्तसर्वकामत्वात् पूर्णः अतएवेश्वरः सर्वनियंताईदृशोपित्वंममगर्भरूपेगृहे मदीयपुत्रणाधि
क्याज्जातः जातइव ॥५५॥ अवसानेस्वस्यावसानकालेतिवार्धके इत्यर्थः ॥ त्वदेवतारसमाप्तिकालेचसमयः
प्रश्नावसरः ॥ आत्मबोधजः अज्ञानजः छल्लोननिवर्त्ततेसर्वदात्वसंगात्किंचिन्निवृत्तोपिसर्वथाननिवर्त्ततइति

परमात्मापरानंदः पूर्णः पुरुषईश्वरः ॥ जातोसिमेगर्भेगृहेममपुत्रणातिरेकतः ॥५५॥ अवसा
नेममाप्यद्यसमयोभूद्द्यूत्तम ॥ नाद्याप्यबोधजः छल्लोभववंधोनिवर्त्तते ॥५६॥ इदानीमपि
मेज्ञानंभववंधनिवर्त्तकं ॥ यथासंक्षेपतोभूयात्तथाबोधयमांविभो ॥५७॥ निर्वेदवादिनी
मेवंमातरंमात्रवत्सलः ॥ दयालुः प्राहधर्मात्माजराजर्जरितांप्रभुः ॥५८॥ मार्गास्त्रयोमया
प्रोक्ताःपुरामोक्षाप्तिसाधकाः ॥ कर्मयोगोज्ञानयोगोभक्तियोगश्चशाश्वतः ॥ तेषांतुसुलभो
मार्गोभक्तियोगः सुपूजितः ॥५९॥
भावः ॥५६॥ इदानीमपि अवसानकालेपितथासंक्षेपतोबोधयेत्यन्वयः ॥५७॥ निर्वेदोविषयेष्वलंप्रत्ययस्तद्वक्ते
नवादिनीमीदृशवचनवक्त्रीं ॥५८॥ त्रीन्मार्गान्नाह कर्मेत्यादि अत्रेदंबोध्यं ज्ञानयोगस्त्रिधा एतज्जन्मानुष्ठि
तकर्मयोगसंपादितचित्तशुद्ध्याजातः ॥ एवज्जन्मानुष्ठितभक्तिसोपानकृतचित्तशुद्ध्याजातः ॥ पूर्वार्जिताभ्या
मोभ्यांसंपादितयातयाएतज्जन्मनितदनुष्ठानामपेक्षोवेत्तिजन्मयाकेवलकर्मभक्तिभ्यांज्ञानंविनामो

स्कस्पतमेववविति ॥ ॥

ए० उ० अ०
४०

तिमत्सुमेति नान्यः पंथा विद्यतेऽयनाय इति श्रुतिविरुद्धतया यथाश्रुतमूला संगतिः स्यादिति दिक् ॥ तेषां मध्ये भक्ति
योगरूपो मार्गो ज्ञानजनने सुलभ इत्यर्थः ॥ ७ ॥ गुणभेदतः तमोर[illegible] सत्वरूपगुणभेदेन तामसी राजसी सात्वि
की चेति त्रिधेत्यर्थः ॥ ८ ॥ भक्तित्रैविध्याद् भक्तस्यापि त्रैविध्यं तत्र तामसभक्तमाह य इति हिंसां शत्रोः दंभं पूजा
लाभादिफलकं मात्सर्यं परगुणद्वेषः भेददृष्टिः ॥ अरिमित्रादि दृष्टिः संरंभी तत्तद्विषयकाग्रहवान् ॥ ९ ॥ फ

१ मस्य

भक्तिर्विभिद्यते मातस्त्रिविधा गुणभेदतः ॥ स्वभावो यस्तेन तस्य भक्तिर्विभिद्यते ॥ ७ ॥ यस्तु हिं
सां समुद्दिश्य दंभं मात्सर्यमेव वा ॥ भेदबुद्धिश्च संरंभी भक्तो मे तामसः स्मृतः ॥ ८ ॥ फलाभिसं
धिर्भोगार्थी धनकामो यशस्तथा ॥ अर्चादौ भेदबुध्या मां पूजयेत्स तु राजसः ॥ ९ ॥ परस्मि
न्नर्पितं यस्तु कर्म निर्हरणाय वा ॥ कर्त्तव्यमिति वा कुर्याद् भेदबुध्या स सात्विकः ॥ १० ॥ ॥

लं स्वर्गः तदभिसंधिः तत्कामः भोगः ऐहिकः ॥ यशः इत्यस्य यशःकाम इत्यर्थः ॥ गोबलीवर्दन्यायेन पृथङ्निर्देशः
अर्चादौ प्रतिमादौ आदिना स्थंडिलादिग्रहः ॥ स्थान संग्रहः भेदबुध्या ॥ अयमुपास्योऽहमुपासक इत्येवं रूपा
॥ १० ॥ यो निर्हरणं पापनाशाय कर्म मत्पूजनरूपं परस्मिन्नपि ॥ अर्पितं कुर्यात् भगवतः परणयापदस्व
त्रेणमया कृतं तेन स एव तुष्यत्विति बुद्ध्या ब्रह्मार्पणं मअ यद्वा प्रशस्त्रबोधितत्वाद्वश्यं कर्त्तव्यमिति बु
ध्या वा यः कुर्यात् स सात्विकः ॥ अत्रापि भेदबध्येत्सु पादानाद् भेदबुद्धिरेत्फलमिति सूचितं ॥ १० ॥ ॥

ए० म०
४०

एतत्फलीभूतं निर्गुणभक्तियोगलक्षणमाह ॥ मद्गुणेति ॥ अविच्छिन्ना मनोवृत्तिरित्यं तेन अनंतगुणालये मयि या
विच्छिन्ना मनोवृत्तिरेतत्सगुणध्यानस्य निर्गुणध्यानस्य लक्षणं प्रापकं तत्र दृष्टांतः ॥ यथा गंगांबुनोंबुधौ इति
अनेनाभेदविषयत्वं मनोवृत्ते दर्शितं ॥ १४ ॥ अहैतुकमिति फलानदेशः अतएवाव्यवहिता विशेषेण व्यवहितासंबं
धः सार्ष्टिः सारूप्यं ॥ १५ ॥ उक्तफलानिं दर्शयन्नपि परं तु भक्ता मत्सेवनं विना तेषु मत्सेवाया अभावात् तानि नगृ

मद्गुणश्रवणादेव मय्यनंतगुणालये ॥ अविच्छिन्ना मनोवृत्तिर्यथा गंगांबुनोंबुधौ ॥ तदेव भ
क्तियोगस्य [illegible]लक्षणं निर्गुणस्य हि ॥ १४ ॥ अहैतुक्यव्यवहिता या भक्तिर्मयि जायते ॥ सामे सा
लोक्य सामीप्य सार्ष्टि सायुज्यमेव वा ॥ १५ ॥ ददास्यपि नगृह्णंति भक्ता मत्सेवनं विना ॥ स ए
वात्यंतिको योगो भक्तिमार्गस्य भामिनि ॥ १६ ॥ मद्भावं प्राप्नुयात्तेन अतिक्रम्य गुणत्रयं ॥ म
हताकामहीनेन स्वधर्माचरणेन च ॥ १७ ॥ कर्मयोगेन शस्तेन वर्जितेन विहिंसनं ॥ मद्दर्शन
स्तुतिमहापूजाभिः स्मृतिवंदनैः ॥ १८ ॥ भूतेषु मद्भावनयाऽसंगेनासत्त्ववर्जनैः ॥ बहुमाने
न महतां दुःखिनामनुकंपया ॥ १९ ॥

ह्णंति नांगीकुर्वंति स एव सालोक्यादितिरस्कार एव आत्यंतिको योगः स एव ब्रह्मणो भक्तो यो मत्सेवारहि
तं मोक्षमपि न बहु मन्यते इति ॥ १६ ॥ तेन भक्तियोगेन गुणत्रयं तद्रूपां मायाम् अतिक्रम्य मद्भावं मय्यैक्यं प्राप्नुयात् ॥
अथ कर्मयोगमाह ॥ महतेति कामहीनेन फलोद्देशहीनेन स्वधर्मो नित्यनैमित्तिकरूपः तादृशेन कर्मयो

यमादयो यमनियमप्राणायामादयः॥७०॥ अहमः अहंकारस्य अहं कर्मेत्यादि बुद्धेः ममधर्मस्य मत्तः ज्ञानादिरूपस्य कांक्षया इच्छया॥७१॥ अंजसा शीघ्रं मां याति मद्भिन्नो भवति स्वाश्रयात् वायुना स्वाश्रयाय कर्षणात्॥७२॥ अहमात्मा अवस्थितः सर्वत्र चेतनो हमेवेत्यर्थः॥७३॥ तं सर्वत्र चैतन्यसंपादकं मामज्ञात्वा बहिः क्रियोत्पन्नैरनेकभेदैर्द्रव्यैर्गंधपुष्पधूपादिभिर्हेलं वसेतोषणं संतोषणं कुरुते न ज्ञनपति इत्यर्थः सर्वभूतस्थितत्वे

स्वसमानेषु मैत्र्या च यमादीनां निषेवया॥ वेदांतवाक्यश्रवणान्मम नामानुकीर्तनात्
॥७०॥ सत्संगेनार्जवेनैव ह्यहमः परिवर्जनात्॥ कांक्षया मम धर्मस्य परिशुद्धांतरो जनः॥
॥७१॥ मद्गुणश्रवणादेव याति मामंजसा जनः॥ यथा वायुवशाद्गंधः स्वाश्रयाद्घ्राणमाविशेत्
॥७२॥ योगाभ्यासरतं चित्तमेवमात्मानमाविशेत्॥ सर्वेषु प्राणिजातेषु ह्यहमात्मा व्यवस्थितः॥७३॥ तमज्ञात्वा विमूढात्मा कुरुते केवलं बहिः॥ क्रियोत्पन्नैरनेकैर्द्रव्यैर्मे नानुतोषणं॥७४॥ भूतावमानिनार्चायामर्चितो हं न पूजितः॥७५॥ तावन्मामर्चयेद्देवं प्रतिमादौ स्वकर्मभिः॥ यावत्सर्वेषु भूतेषु स्थितं चात्मनि न स्मरेत्॥ यस्तु भेदं प्रकुरुते स्वात्मनश्च प

न मामज्ञात्वा हृतया पूजया मोक्षफलदो मम संतोनेत्यर्थः॥ अर्चित इत्यस्य व्याख्या॥७४॥ सर्वप्राणिपमानकर्त्रा यावत् न तिमानहूजिता तादेवस्त्रिशानां साधनायोग्यातरनंतरं त्वत्पूजेत्यर्थः॥ पूजित इति॥७५॥ तावन्मामर्चयेदित्यर्थं मध्यगाणि स्याये नोत्तरान्वयरपि यावत्सर्वभूतस्थितं मामात्मनि न स्मरेत् स एवाह

देवपूजादावधिकारेण तदुदरं पूज्यपूजकभावापगमादिति भावः इममेव भावनामुख्येति ध्वनयितुं भेदं निंदति य
स्त्विति भिन्नदृष्टेस्तस्य मृत्युर्भयं कुर्यात् अत्र संशयो नास्तीत्यर्थः ॥७६॥ तस्माद्देहं स्वस्यैव हमुपास्य इत्याह मा
मतइति एकं मां ज्ञानेन मानेन एवं ज्ञानपूर्वकं सर्वप्राणिसंमाननेन मैत्र्या सर्वत्र मित्रबुध्या मामर्चयेत् इय
मेवमेमुख्या पूजा क्वापि शत्रुबुद्धिः सर्वथा न कार्येति भावः अभिन्नधीः ॥ एक एव चेतनो भगवान् सर्वत्रेसे

भिन्नदृष्टेर्भयं मृत्युस्तस्य कुर्यान्न संशयः ॥ मामतः सर्वभूतेषु परिछिन्नेषु संस्थितं ॥७७॥ एकं
ज्ञानेन मानेन मैत्र्या चार्चेदभिन्नधीः ॥ चेतसैवानिशं सर्वभूतानि प्रणमेत्सुधीः ॥७८॥ ज्ञात्वा मां
चेतनं शुद्धं जीवरूपेण संस्थितं ॥ तस्मात्कदाचिन्नेक्षेत भेदमीश्वरजीवयोः ॥७९॥ भक्तियोगो
ज्ञानयोगो मया मातरुदीरितः ॥ आलंब्यैकतरं वापि पुरुषः शममृच्छति ॥८०॥ ततो मां भक्तियो
गेन मातः सर्वहृदिस्थितं ॥ पुत्ररूपेण वा नित्यं स्मृत्वा शांतिमवाप्स्यसि ॥८१॥ श्रुत्वा रामस्य
वचनं कौसल्यानंदसंप्लुता ॥ रामं सदा हृदि ध्यात्वा छित्वा संसारबंधनं ॥८२॥

१ वं बुद्धिरित्यर्थः

॥ तथा सर्वभूतानि चेतसा प्रणमेत् ॥७८॥ तत्र हेतुर्ज्ञात्वेति ईश्वरजीवयोरिति परमात्मजीवात्मनोश्चेतस्यपि वो
ध्यं ॥७९॥ ज्ञानयोगो भक्तियोगसहितो ज्ञानयोग इत्यर्थ एकतरं केवलं भक्तियोगमपीत्यर्थः शममृच्छति
तस्य परिणामे ज्ञानयोगस्यापकत्वादिति भावः भक्तियोगेन उक्तरूपमीश्वरः पूज्य इत्येवं रूपेण तत्रासामर्थ्ये
आह पुत्ररूपेण वेति ॥८१॥८२॥ ॥

तिस्रो गतीः सात्विकराजसतामसीः ॥ तत्र सात्विकी अर्चिरादिगतिः राजसी धूमादिगतिस्तामसी जायस्व म्रियस्वे
त्येवंरूपा तत्राद्या दहरघुपासकानां द्वितीया कर्मिणां तृतीया न्येषां परमां गतिं नाम्ना एण शुद्धां मं सत्रैव स
मवलीयेत इति ज्ञोनि प्राप्य ॥ ८३ ॥ पूर्वमेव चित्रकूट गिरौ ॥ ८४ ॥ इति श्रीमदध्यात्मरामायणस्य टीकायां उ

अतिक्रम्य गतीस्तिस्रो प्यवाप परमां गतिं ॥ ८३ ॥ कैकेयी चापि योगं रघुपतिगदितं पूर्वमेवा
धिगम्य श्रद्धाभक्तिप्रशांता हृदि रघु[illegible] तिलकं भावयंती गतासुः ॥ गत्वा स्वर्गे स्फुरंती दश
रथसहिता मोदमाना वतस्थे माता श्रीलक्ष्मणस्याप्यतिविमलमतिः प्राप भर्त्तुः समीपं
८४ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकांडे सप्तमः सर्गः ॥ ९ ॥ अथ काले
गते तस्मिन् भरतो भीमविक्रमः ॥ युधाजिता मातुलेन ह्याहूतो गंधर्वसैनिकः ॥ १ ॥ रामाज्ञया ग
तास्तत्र हत्वा गंधर्वनायकान् ॥ तिस्रः कोटीः पुरे द्वे तु निवेश्य रघुनंदनः ॥ २ ॥ पुष्करं पुष्कराव
वत्सांत स्तक्षं तक्षशिलाह्वये ॥ अभिषिच्य सुतौ तत्र धनधान्यसुहृद्वृतौ ॥ ३ ॥ पुनरागत्य भरतो
राम सेवा परो भवत् ॥ ततः प्रीतो र[illegible] घुश्रेष्ठो लक्ष्मणं प्राह सादरं ॥ ४ ॥

॥ उत्तरकांडे सप्तमः सर्गः

८ ॥ अथेति कस्मिन् दिवसे ॥ मातुलेनाहतः स्वदेशसमीपवर्त्तिगंधर्वविषयस्य गंधर्वं च धार्यं ॥ १ ॥ ति
स्रः कोटीः गंधर्वनायकान् हत्वा लब्धयः पुरे पुष्करावती तक्षशिलाख्ये ॥ २ ॥ सुतौ पुष्कर तक्षक नामानौ

४ श्रीमहादेव उवाच ॥

कुमारौ स्वपुत्रौ पश्चिमां दिशं पाहीतिशेषः ॥५॥६॥७॥८॥ ततः समागमानंतरं ॥९॥ अतिबलस्य महर्षिमुख्यस्य दू

उभौ कुमारौ सौमित्रे गृहीत्वा पश्चिमां दिशं ॥ तत्र म्लेच्छान्वि निर्जित्य दुष्टान्सर्वापकारिणः ॥५॥ अं
गदश्चित्रकेतुश्च महासत्वपराक्रमौ ॥ द्वयोर्हि नगरे कृत्वा गजाश्वधनरत्नकैः ॥६॥ अभिषिच्य
सुतौ तत्र शीघ्रमागत्य मां पुनः ॥ रामस्याज्ञां पुरस्कृत्य गजाश्वबलवाहनः ॥७॥ गत्वा हत्वा रिपून्स
र्वान्स्थापयित्वा कुमारकौ ॥ सौमित्रिः पुनरागत्य रामसेवापरोऽभवत् ॥८॥ ततस्त्वेककाले मह
ति प्रयाते रामं सदा धर्मपथे स्थितं हरिं ॥ द्रष्टुं समागाद्द्विवेषधारी कालस्ततो लक्ष्मणमि
त्युवाच ॥९॥ निवेदयस्वातिबलस्य दूतं मां द्रष्टुकामं पुरुषोत्तमाय ॥ रामाय विज्ञापनमस्तित
स्य महर्षिमुख्यस्य चिराय धीमन् ॥१०॥ तस्यैतद्वचनं श्रुत्वा सौमित्रिस्त्वरयान्वितः ॥ आच
चक्षे प्ररामाय ससंप्राप्तं तपोधनं ॥११॥ एवं ब्रुवंतं रामो वाच लक्ष्मणं राघवो वचः ॥ शीघ्रं
प्रवेशय तं तत्र मुनिः सत्कारपूर्वकं ॥१२॥ लक्ष्मणस्तु तथेत्युक्त्वा प्रावेशयत तापसं ॥ स्व
तेजसा ज्वलंतं तं घृतसिक्तमिवानलं ॥१३॥

॥ तं रामं द्रष्टुकामं पुरुषोत्तमाय रामाय निवेदय स्वतस्मा
हं दूतस्तस्य महर्षिमुख्यस्य रामाय चिराय विज्ञापनमस्ति रामं प्रति चिरकालं बोधनीयवाक्यमस्ति ॥१०॥
स सौमित्रिरित्यन्वयः ॥११॥१२॥१३॥ ॥ ॥

वर्धस्वेत्यस्य भूरराज्याधिकस्वर्ग॥ राज्यलाभेनवर्धस्वेति तद्धृदयस्थितोस्यार्थः॥१४॥ तेनानामयं स्ष्टष्टो राम[illegible]
स्तस्मै अनामयं दृष्ट्वाप्रोवाचेत्यन्वयः॥१५॥ यदर्थं यत्प्रापणार्थं तत्स्वस्वामिवाक्यं॥१६॥ इदमेव रहस्यमेव
अनालक्ष्यं तृतीयेनेति शेषः॥१७॥ तदेव स्पष्टयति नान्येनेति निरीक्षेद्वाकथयं तावावामिति शेषः॥१८॥ अत्र

सोतिगम्य रघुश्रेष्ठं दीप्यमानस्वतेजसा॥ मुनिर्मधुरवाक्येन वर्धस्वेत्याह राघवं॥१४॥ तस्मै
समुनये रामः पूजां कृत्वा यथाविधि॥ दृष्ट्वानामय[illegible]मप्यथो रामः दृष्टोयं तेन सः॥१५॥ दिव्या
सने समासीनो रामः प्रोवाच तापसं॥ यदर्थं मागतोसि त्वमिह तत्प्राप्यस्व मे॥१६॥ वाक्येन चो
दितस्तेन रामेणाह मुनिर्वचः॥ इदमेव प्रयोक्तव्यमनालक्ष्यं तु तद्वचः॥१७॥ नान्येनैवं तच्छ्रोत
व्यं नाख्यातव्यं च कस्यचित्॥ स्ट्रणु पाद्यानि रीक्षेद्वायः स वध्यस्त्वया प्रभो॥१८॥ तथेति च प्रति
ज्ञाय रामो लक्ष्मणमब्रवीत्॥ तिष्ठ त्वं द्वारि सौमित्रे नायातत्र जनो रहः॥१९॥ यथागच्छति को वा.
पि स वध्यो मे न संशयः॥ ततः प्राह मुनिं रामो येनवा त्वं विसर्जितः॥२०॥ यत्ते मनी[illegible]षितं वाक्यं
तद्वदस्व ममाग्रतः॥ ततः प्राह मुनिर्वाक्यं स्ट्रणु राम यथातथं॥२१॥

॥ रहः रहस्यानेजनः आवा
भ्यामतिरिक्तस्तृतीयोजन इत्यर्थः॥१९॥ वाकोवापि त्वं वा अन्यो वा येन चामेन त्वं विसर्जितः प्रेषितस्तस्य
वा मनीषितं॥ अथवा ते तवैव मनीषितं यद्वाक्यं तद्वदस्व॥२०॥ यथातथ्यं सत्यमित्यर्थः॥२१॥ ॥

त्वं क इति जिज्ञासां संभाव्य स्वयमेवोत्तरमाह अहं हीति पूर्वजः सर्वस्य स्यपेक्षया पूर्वः महत्तत्त्वस्यैवापंशाविशेषणमित्याहुः अतिरिक्तमेवेदं तत्वमिति शेषाः ॥२२॥ मायासंगमस्तदीक्षणमात्रं ॥२२॥ अथ वत्स वाक्यमाह रक्षितुमिति समयः अवतारसमये हृतः कालः एतावंतं कालं भूतां भूलोके स्थित्वा पुनः स्वर्गमागतिसेवं रूपः ननु मम स्वर्गेण कः संबंध इत्याशंकां निवर्त्तं पितुपूर्वकथामाह ॥ पुरेति सदेव सौम्येदमग्र आसीत् ॥ इति श्रुते मायये का

त्रस्तणमेषितो स्मी श कार्पार्थितें तिकं प्रभो ॥ अहं हि पूर्वजो देव तव पुत्रः परंतप ॥२२॥ माया संगमजो वीर कालः सर्वहरः स्मृतः ॥ ब्रह्मा त्वामाह भगवान्सर्वदेवर्षिपूजितः ॥२३॥ रक्षितुं स्वर्गलोकस्य समयस्ते महामते ॥ पुरा त्वमेक एवासीर्लोकान्संहृत्य मायया ॥२४॥ भार्यया सहितस्त्वं मामारोपुत्रमजीजनः ॥ तथा भोगवतं नागमनंतमुदकेशयं ॥२५॥ मायया जनयित्वा त्वं द्वौ सत्त्वौ मधुकैटभौ ॥ दैत्यौ हत्वा मेदोस्थिसंचयैः ॥२६॥ इमां पर्वतसंबद्धां मेदिनीं पुरुषर्षभ ॥ पद्मे दिव्यार्कसंकाशे नाभ्यामुत्पाद्य मामपि ॥२७॥ मां विधाय प्रजाध्यक्षं मयि सर्वं न्यवेदयत् ॥ सोहं संयुक्तसंभारस्त्वामवोचं जगत्पते ॥२८॥

\पीक्ष्यत्वात्वदभेदेनैव तदेति भावः ॥२४॥ भार्यया मायया भवत्संनिध्येन तस्या एवं परिणामशीलत्वादिति भावः भोगवंतं शेषं नुम भाव आर्षः एतावनुभावपि महत्तत्त्वाधिष्ठातारौ विस्याहुः ॥२५॥ सत्त्वौ सपराक्रमौ तन्मेदो दोषस्थितं च संतत रूपां ॥२६॥ इमां मेदिनीं निर्मितवानिति शेषः तत्र सुतस्य ताभ्यां विपद्माने पद्मे मामुत्पाद्य ॥२७॥ तच्च मां प्रजाध्यक्षं विधा

५ महाबलो ॥

प्रजानाम्भिमां सर्वं प्रजोत्ता इत्या उत्सारि मां स्रष्टुं
वेदं यत्स्वात्मिकात्सं संयुक्तसंभारः धृतां मोहात
प्रजोक्ता संतत्वा हि वैगारः ॥२८॥

मेवीर्यप्रहारिणः मेवीर्यस्य मत्स्य ज्ञानां दुःखदा इत्यर्थः ततः मां प्रति तथा प्रतिज्ञातो नरमित्यर्थः ॥२९॥३०॥
३१॥ समयेवासकालप्रतिज्ञां मनोरथः प्रतिज्ञाविषयकालः नपुनर्लोके आयुषि पूर्णेसति ॥३२॥ अहं कालस्ता

रक्षांविधत्स्व भूतेभ्यो येमेवीर्यप्रहारिणः ॥ ततस्त्वं कश्यपाज्जातो विष्णुर्वामनरूपधृक् ॥२९॥ हृतवानसि भूभारं वधाद्रक्षोगणस्य च ॥ सर्वासत्सार्यमाणासु प्रजासु धरणीधर ॥३०॥ रावणस्य वधाकांक्षी मर्त्यलोकमुपागतः ॥ दशवर्षसहस्राणि दशवर्षशतानि च ॥३१॥ कृत्वा वासस्य समयं त्रिदशो ह्यात्मनः पुरा ॥ सतेमनोरथः पूर्णः पूर्णे चायुषि तेन्व पु ॥३२॥ कालस्तापसरूपेण त्वत्समीपमुपागमं ॥ ततो भूयश्चते बुद्धिर्यदि राज्यमुपासितुं ॥३३॥ तत्तथा भवभद्रं ते एवमाह पितामहः ॥ यदि ते गमने बुद्धिर्देवलोकं जितेंद्रिय ॥३४॥ सनाथा विष्णुना देवा भवंतु विगतज्वराः ॥ चतुर्मुखस्य तद्वाक्यं श्रुत्वा कालेन भाषितं ॥३५॥ हसन्नूराम स्तदावाक्यं कृत्स्नस्यांतकमब्रवीत् ॥ श्रुतं तव वचो मे घ ममापीष्टतरं तु तत् ॥३६॥ संतोषः परमो प्राप्त स्त्व[illegible]दागमनकारणात् ॥ त्रयाणामपि लोकानां कार्यार्थं मम संभवः ॥३७॥ भद्रं ते स्वागमिष्यामि यत एवाहमागतः ॥ मनोरथस्तु सं[illegible] प्राप्तो न मे त्रास्ति विचारणा ॥३८॥

पश्चस्तौ रूपेण त्वत्समीपमुपागमं प्राप्तवानस्मि ॥३३॥ ततथा भवराज्यमुपास्वेत्यर्थः ॥३४॥३५॥ कृत्स्नस्य जग तोंतकं नाशकं कालमित्यर्थः ॥३६॥ कार्यार्थं संभवः तेन निष्पन्नकार्यस्यावस्थानेन प्रयोजनमित्यर्थः ॥३७॥ मनो

रथः क्षयमेवमेवमनोरथो यदि तेगमने मतिरिति
भावः ॥३८॥

स्यात्त्वं तत्क्षणाद्यो युक्तेन मा त्वं मायया ये स्वनेन सर्वमिदं मायैवेति ध्वनयति ॥३९॥ आदृतं यथा भवति तथा दर्शनेच्छया राजद्वारमभ्यगात् ॥४०॥४१॥ रामेण कार्यं किं ते इति तत्सर्वकार्यमहं संपादयामि इति भावः ॥ तदेवाह किं ते

३ मे

मत्सेवकानां देवानां सर्वकार्येषु वै मया ॥ स्यात्त्वं मायया पुत्र यथा चाह प्रजापतिः ॥३९॥
एवं तयोः कथयतो दुर्वासा मुनिरभ्यगात् ॥ राजद्वारं राघवस्य दर्शनापेक्षया दृतं ॥४०॥ मुनिर्लक्ष्मणमासाद्य दुर्वासा वाक्यमब्रवीत् ॥ शीघ्रं दर्शय रामं मे कार्यं संतमाहितं ॥४१॥ तच्छ्रुत्वा प्राह सौमित्रिर्मुनिं ज्वलनतेजसं ॥ रामेण कार्यं किं ते द्य किं ते भीष्टं करोम्यहं ॥४२॥ राजा कार्यांतरे व्यग्रो मुहूर्तं संप्रतीक्ष्यतां ॥ तच्छ्रुत्वा क्रोधसंतप्तो मुनिः सौमित्रिमब्रवीत् ॥४३॥ अस्मिन्क्षणे तु सौमित्रे न दर्शयसि चेद्धि मां ॥ रामं सविषयं वंशं भस्मी कुर्यान्न संशयः ॥४४॥ श्रुत्वा तद्वचनं घोरं ऋषेर्दुर्वाससो भृशं ॥ स्वरूपं तस्य वाक्यस्य चिंतयित्वा स लक्ष्मणः ॥४५॥ सर्वनाशाद्वरं मे द्य नाशो ह्येकस्य कारणात् ॥ निश्चित्यैवं ततो गत्वा रामाय प्राह लक्ष्मणः ॥४६॥ सौमित्रेर्वचनं श्रुत्वा रामः कालं व्यसर्जयत् ॥ शीघ्रं निर्गम्य रामोपि ददर्शात्रेः सुतं मुनिं ॥४७॥

इत्यादि ॥४२॥४३॥ वंशो दशरथस्येति शेषः तेन सर्वेषां भरतादीनां नाशं करिष्यामीत्यर्थः ॥४४॥ भृशमतिशयेन घोरमित्यन्वयः स्वरूपं वाच्यं व्यंग्यं चार्थं ॥४५॥ कारणात् दुर्वाससो रूपात् ॥४६॥ ४७ ॥ छ॥

४८॥ वर्षसहस्राणां संबंधी य उपवासस्तस्य समापनं समाप्तप्रार्थः॥४८॥ परसिद्धं गृहे स्थितं भोजनमिच्छामि ४
अमृतममृतवत्स्वादुः॥५१॥ कालेन भाषितमित्यन्वयः स्मृत्वा च शोकादियुक्तः सन्॥५२॥ मनसा हत प्रायं ज्ञा

एमो भिया घसंप्रीतो मुनिं पप्रच्छ सादरं॥ किं कार्यं ते करोमीति मुनिमाह रघूत्तमः॥४८॥ तच्छ्रु
त्वा राम वचनं दुर्वासा राम मब्रवीत्॥ अद्य वर्षसहस्राणामुप वाससमापने॥४९॥ अतो भु
जनमिच्छामि सिद्धं यत्ते रघूत्तम॥ रामो मुनि वचः श्रुत्वा संतोषेण समन्वितः॥५०॥ स सिद्धम
न्नं मुनये प्रायावत्समुपाहरत्॥ मुनिर्भुक्त्वान्नममृतं संतुष्टः पुनरभ्यगात्॥५१॥ स्वमाश्र
मं गते तस्मिन्नामः संस्मारभाषितं॥ कालेन शोकदुःखार्तो विमना ह्यतिविह्वलः॥५२॥
अवाङ्मुखो दीनमना न शशाक भिभाषितुं॥ मनसा लक्ष्मणं ज्ञात्वा हत प्रायं रघूत्तमः॥
॥५३॥ अवाङ्मुखो बभूवाथ तूष्णीमेवाविक्लेश्वरः॥ ततो रामं विलोक्याह सौमित्रिर्दुःख
संप्लुतं॥५४॥ तूष्णीं भूतं चिंतयंतं गर्हंतं स्नेहबंधनं॥ मत्कृते त्यज संतापं जहि मां रघुनंदन
॥५५॥ गतिः कालेन स्वक्लृप्ता पूर्वमेवेदृशी प्रभो॥ त्वयि हीनप्रतिज्ञे तु नरको मे ध्रुवं भवेत्
॥५६॥ मयि प्रीतिर्यदि भवेद्यद्यनुग्राह्यतातव॥ त्यक्त्वा शंकां जहि प्राज्ञ मां माधर्मं त्यजप्र
भो॥५७॥

त्वा प्रतिज्ञाया अन्यथा कर्तुमशक्यत्वादिति भावः॥५३॥५४॥ स्नेहकृतं बंधनं गर्हंतं निंदंतं स्नेहाद्धेः शक्त
तातदकरणे च प्रतिज्ञाहानिरिति चिंतयंतं॥५५॥ पूर्वमेवेदृशीति ररमवपूर्वभावीति भावः मत्कृते त्वल्प

यस्य मुख्यं धर्मस्तद्विधेयानां च तत्प्रतिज्ञानि
र्वहणं परमो धर्म इति च सूचितं॥५७॥ ॥

तिज्ञाहानौ मम पापित्वाकरत्वर्थः॥५६॥ धर्मं मा
त्यजेत्यस्य स्वपः अनेन प्रतिज्ञापालनमेव क्षत्रि

चलितमानसस्त्वत्क्तभ्रातृस्नेहः ॥५८॥ मुनेर्दुर्वाससः ॥५९॥ ६०॥ भूभारहारिणस्तावन्मात्रफलकतया धृतशरीरस्य तवपूर्ववृत्तः पूर्वमित्यर्थः लक्ष्मणगमनेनिर्दिष्टंभाविसत्यर्थोस्माभिर्ज्ञातएवास्ते ६१ प्रतिज्ञार्थेपरित्यक्ते:न्यथाकृते ६२

सौमित्रिणेकृतंश्रुत्वा राम स्खलितमानसः ॥ आहूयमंत्रिणःसर्वान्वसिष्ठंचेदमब्रवीत् ॥५७॥ मुनेरागमनंमृत्युकालस्यापिहि भाषितं ॥ प्रतिज्ञामात्मनश्चैवसर्वमावेदयत्प्रभुः ॥५९॥ श्रुत्वा रामस्य वचनंमंत्रिणः सपुरोहिताः ॥ ऊचुः प्रांजलयः सर्वे राममक्लिष्टकारिणं ॥६०॥ पूर्वमेवहि निर्दिष्टं तव भूभारहारिणः ॥ लक्ष्मणेनवियोगस्ते ज्ञातोविज्ञानचक्षुषा ॥६१॥ त्यजाशु लक्ष्मणं राम मा प्रतिज्ञां त्यजप्रभो ॥ प्रतिज्ञाते परित्यक्ते धर्मो भवति निष्फलः ॥६२॥ धर्मे नष्टे खिलं राम त्रैलोक्यं नश्यति ध्रुवं ॥ त्वंतु सर्वस्य लोकस्य पालकोसि रघूत्तम ॥६३॥ त्यक्ते लक्ष्मणमेवैकं त्रैलोक्यं त्रातुमर्हसि रामो धर्मार्थसहितं वाक्यं तेषामनिंदितं ॥६४॥ सभामध्ये समाश्रुत्य प्राह सौमित्रिमंजसा ॥ मुच्छे गच्छ सौमित्रे मा भूद्धर्मस्य संक्षयः ॥६५॥ परित्यागो वधो वापि सतामेवोभयं समं ॥ एवमुक्ते रघुश्रेष्ठे दुःखव्याकुलितेक्षणः ॥६६॥ रामं प्रणम्य सौमित्रिः शीघ्रं गृहमगात्स्वकं ॥ ततो गात्सरयूतीरमाचम्य स कृतांजलिः ॥६७॥ नवद्वाराणि संयम्य मूर्ध्निप्राणमधारयत् ॥ यदक्षरं परंब्रह्मवासुदेवाख्यमव्ययं ॥६८॥

धर्मे नष्टे रज्ञो धर्मे नष्टे त्यर्थः ॥ तव त्रैलोक्यपालकत्वेन त्वद्धर्मनाशे सर्वत्रैलोक्यनाश इति भावः ॥६३॥ ६४ समाश्रुत्य सवसिष्ठादिवाक्यं श्रुत्वेत्यर्थः ॥६५॥ सतामुभयं समं चेत्यन्वयः उक्ते उक्तवतीत्यर्थः ॥६६॥

९_ नवद्वाराणि चक्षुषी कर्णौ नासिकामुख पायूपस्थे ब्रह्मरंध्रं चेति ९०॥

अभ्यर्चितपत्त्वा सुदेवोहमित्यध्यायत तु ष्टुवुः पुष्पैः समाकिरंश्च विबुधैः कैश्चिद् दृष्टपूर्वं कैरपि देवैर्न दृष्ट
मित्यर्थः ॥ ७० ॥ ७१ ॥ हरौ हर्यश्वे सिद्धलोकं गत योगिनः ॥ तत्त्रोकस्य योगिन इत्यर्थः ॥ आहितं प्राप्तं महाहिरूपं येन
तत् उग्धं यथा दधिभावमापद्यते तत्प्रायमेव देहस्तत्रादिरूपमातामातरत्यर्थः ॥ ७२ ॥ इति श्रीमदध्यात्मरा
पदं तत्परं धाम चेतसा सोभ्यर्चितपत् ॥ वायुरोधेन संयुक्तं सर्वे देवाः सहर्षयः ॥ ६९
साग्नयो लक्ष्मणं पुष्पैस्तुष्टुवुश्च समाकिरन् ॥ अदृश्यं विबुधैः कैश्चित् सशरीरं सवा
सवः ॥ ७० ॥ गृहीत्वा लक्ष्मणं शक्रः स्वर्गलोकमथागमत् ॥ ततो विष्णोश्चतुर्भागं तं दे
वं सुरसत्तमाः ॥ सर्वे देवर्षयो दृष्ट्वा लक्ष्मणं समपूजयन् ॥ ७१ ॥ लक्ष्मणे हि दिवमा
गते हरौ सिद्धलोकं गतयोगिनस्तदा ॥ ब्रह्मणा सह समागमन्मुदा दृष्टमाहितम
हाहिरूपकं ॥ ७२ ॥ इति श्रीमदध्यात्मरामायणे उमामहेश्वरसंवादे उत्तरकाण्डे अष्ट
मः सर्गः ॥ ८ ॥ गते लक्ष्मणं तु परित्यज्य रामो दुःखसमन्वितः ॥ मंत्रिणो नैगमांश्चैव
वसिष्ठं चेदमब्रवीत् ॥ १ ॥ अभिषेक्ष्यामि भरतमद्य राज्ये महामतिं ॥ अद्य चाहं गमि
ष्यामि लक्ष्मणस्य पदानुगः ॥ २ ॥ एवमुक्ते रघुश्रेष्ठे पौरजानपदास्तदा ॥ द्रुमा इव छि
न्नमूला दुःखार्ताः पतिता भुवि ॥ ३ ॥ मूर्छितो भरतो वापि श्रुत्वा रामाभिभाषितं ॥ गर्ह
यामास राज्यं स प्राहेदं रामसन्निधौ ॥ ४ ॥ सत्येन च शपे नाहं त्वां विना दिवि वा भुवि ॥ कां
मा० अष्टमः सर्गः ॥ ८ ॥ नैगमान् वणिजाः ॥ १ ॥ अद्य याहं आ ॥ क्षेप राज्यं रघुश्रेष्ठ शपे तव सादयोः प्रभो ॥ ५ ॥
ध्ये वाहमित्यर्थः पदानुगः पदास्तत्तु लक्ष्मी हृत्स्य गताः अन्यथा नेन बहुबधा न्येनं स्यादित्यर्थः ॥ २ ॥ उक्ते उक्तव

महादेवा
उवाच

तर्हि स्वर्गगमने कोऽप्यंपालयिष्यतीत्याशंक्याह मावितिः ॥६७॥ तं तथाकृतोरंव दंतं भरतं पतिता भुवीति शेषः

इमौ कुशलवौ राजन्नभिषिंचस्व राघव ॥ कोशलेषु [illegible] कुशं वीरमुत्तरेषु लवं तथा ॥६॥
गच्छंतु दूतास्त्वरितं भ[illegible]त्रुघ्नानयनाय हि ॥ अस्माकमेतद्गमनं स्वर्वासाय शृणोतु सः ॥७॥
भरतेनोदितं श्रुत्वा पतितास्ताः समीक्ष्य तं ॥ प्रजाश्च भ[illegible]यसंविग्ना राममविश्लेषकातराः ॥
८॥ वसिष्ठो भगवान्राममुवाच सदयं वचः ॥ पश्य तात राजन्सर्वाः पतिता भूतलेप्रजाः ॥९॥
तासां भावानुगं राम प्रसादं कर्तुमर्हसि ॥ श्रुत्वा वसिष्ठवचनं ताः समुत्थाप्य पूज्य च ॥१०॥
सस्नेहो रघुनाथस्ताः किं करोमीति चाब्रवीत् ॥ ततः प्रांजलयः सर्वे प्रोचुः प्रजा भक्त्या
रघूद्वह ॥११॥ गंतुमिच्छसि यत्र त्वमनुगच्छामहे वयं ॥ अस्माकमेषा परमा प्रीतिर्धर्मोयं
मतः प्रभो ॥१२॥ त्वद्गानुगमने राम हृद्गता नो दृढा मतिः ॥ पुत्रदारादिभिः सार्धमनुयामो घ
सर्वथा ॥१३॥ तपोवनं वा स्वर्गं वा पुरं वा रघुनंदन ॥ ज्ञात्वा तेषां मनोदार्ढ्यं कालस्य वचनं
तथा ॥१४॥ भक्तिं पौरजने चैव बाढमित्याह राघवः ॥ कृत्वैवं निश्चयं रामस्तस्मिन्नेवाहनि
प्रभुः ॥१५॥ प्रस्थापयामास च तौ रामभद्रः कुशीलवौ ॥ अष्टौ रथसहस्राणि सहस्रं चैव दं

नातेति स्वबोधनं ॥९॥१०॥११॥ भवानुगं अभिप्रायानुगं पूज्य ते लिंत्सवार्थः ॥ अपंत्वदनुगमनरूपः ॥१२॥१३॥ त
पोवनाद्यप्यत्त मंयत्र तो सितदनुयाम इत्यर्थः ॥१४॥१५॥१६॥

रा० उ० टी०
४७

छन्द्रेण भगवद्वियोगजदुःखासहिष्णुतया क्लेशेन ॥१७।१८॥ अत्रिपुत्रस्य दुर्वाससः प्रतिज्ञामजासु सहनयनवि

षष्टिं चाश्वसहस्राणां मे कैकस्मै ददौ बलं ॥ बहुरत्नौ बहुधनौ हृष्टपुष्टजनावृतौ ॥१७॥ अभि

वाद्य गतौ रम्यं छन्द्रेण तु कुशीलवौ ॥१८॥ शत्रुघ्नानयने दूतान्प्रेषयामास राघवः ॥ ते दूतास्त्व

रितं गत्वा शत्रुघ्नाय न्यवेदयन् ॥१९॥ कालस्यागमनं पैश्चाद्त्रिपुत्रस्य चेष्टितं ॥ लक्ष्मण

स्य च निर्याणं प्रतिज्ञां राघवस्य च ॥१९॥ पुत्राभिषेचनं चैव सर्वं राम चिकीर्षितं ॥ श्रुत्वा तद्दूत

वचनं शत्रुघ्नः नाशनं ॥२०॥ व्यथितोपि धृतिं लब्ध्वा पुत्रावाहूय सत्वरः ॥ अभिषिच्य सुबाहुं

वै मथुरायां महाबलः ॥२१॥ यूपकेतुं च विदिशानगरे शत्रुसूदनः ॥ अयोध्यां त्वरितं गत्वा

त्वयं रामदिदृक्षया ॥२२॥ ददर्श च महात्मानं तेजसा ज्वलनप्रभं ॥ दुकूलयुगसंवीतं ऋषि

भिश्चाक्षयैर्वृतं ॥२३॥ अभिवाद्य रमानाथं शत्रुघ्नो रघुपुंगवं ॥ प्रांजलिर्धर्मसहितं वाक्यं

प्राह महामतिः ॥२४॥ अभिषिच्य सुतौ तत्र राज्ये राजीवलोचन ॥ तवानुगमने राजन्विद्धि

मां कृतनिश्चयं ॥२५॥ त्यक्तुं नार्हसि मां वीर भक्तं तव विशेषतः ॥ शत्रुघ्नस्य दृढां बुद्धिं विज्ञा

य रघुनंदनः ॥२६॥ सज्जीव तु मध्याह्ने भवानित्यभ्रवीद्वचः ॥ अपक्षणात्समुत्सेतुर्वानं

राः कामरूपिणः ॥२७॥ ११भ

॥षष्ठी॥१९॥चिकीर्षितं स्वर्गमनुरूपं कुलस्य भ्रातृसमूहस्य नाशनं ॥२०।२१।२२

अक्षयैः ऋषिभिः अतिजीर्णजीवभिर्वसिष्ठाद्यैः ॥२३॥ २४॥ २५॥२६॥२७॥

५कुल

रा०उ०
४७

२८॥२९॥३०॥३१॥३२॥ मेव चनात्मजाः सप्तद्वीपाधिराक्षसंरक्षः सं वं धिराज्यं च प्रशाधि अतोऽन्यत्मा वदे स्माह शापितोसीति अन्य
वचनोक्तौ महद्भयपातकं तवेति भावः॥३३॥३४॥ ममाज्ञां चिरंजीवेत्येवं रूपां द्वापरांतरे एतच्च तु युगे भिन्नं यत्किंचिच्च तुर्यु

ऋक्षाश्च ये सुसाश्चैव गोपुच्छाश्च सहस्रशः॥ ऋषीणां देवतानां च पुत्रा ये मम निर्गमे॥२८॥ श्रुत्वा प्रो
चुः रघुश्रेष्ठं सर्वे वानरराक्षसाः॥ तवानुगमने विद्धि निश्चितार्थान् हि नः प्रभो॥२९॥ एतस्मिन्नंतरे रामं सु
ग्रीवोपि महाबलः॥ यथा वदभिवाद्याह राघवं भक्तवत्सलं॥३०॥ अभिषिच्यांगदं राज्ये आगतो
स्मि महाबलं॥ तवानुगमने राम विद्धि मां कृतनिश्चयं॥३१॥ श्रुत्वा ते पौरुषं वाक्यं ऋक्षवानर
राक्षसां॥ बिभीषणमुवाचेदं वचनं मृदुसादरं॥३२॥ धरिष्यति धरा यावत्प्रजास्तावत्प्रशाधि मे॥
वचनाद्राक्षसं राज्यं शापितोसि ममोपरि॥३३॥ न किंचिदुत्तरं वाच्यं त्वया मत्प्रियकारणात्
एवं बिभीषणं नूक्त्वाह हनूमंतमथाब्रवीत्॥३४॥ मारुते त्वं चिरंजीव ममाज्ञां मा मृषाकृथाः॥
जांबवंतमथप्राह ति त्वं द्वापरांतरे॥३५॥ मया सार्धं भवेद्युद्धं यत्किंचित्कारणांतरे॥ ततस्तान्
राघवः प्राह ऋक्षराक्षसवानरान्॥३६॥ सर्वानेव मया सार्धं प्रयाते तिष्ठ यान्वितः॥ ततः प्रभाते
रघुवंशनाथो विशालवक्षाः सितकंजनेत्रः॥ पुरोधसं प्राह वसिष्ठमार्यं यांतु अग्निहोत्राणि पुरो

गुरो मे॥३७॥

गं तरे एतद्वापरे॥३८॥ युद्धं भवेत्तु भविष्यतीत्ततः स्वर्गं गमिष्यसीति शेषः अत्र जांबवन्निग्रहणं मैंदद्विविदयोरप्युप
लक्षणं तान् हनूमज्जांबवादिभिन्नान्॥३६॥ ३७॥

अध्यात्मरामायणे उत्तरकाण्डे

प्रस्थानिकं महाप्रस्थानोचितं क्षौमांबर इत्यादि राम विशेषणं ॥ ३७ ॥ पद्मलक्ष्मीः सर्वगतापि सा तात्कालेन ल
क्ष्मीरूपेण संनिहिताजं तेत्यर्थः ॥ ३८ ॥ अरुणकंजहस्ता रक्तपद्महस्ता मूर्त्तदधिष्ठात्री देवता एवमग्रेपि बोध्यं

ततो वसिष्ठोपि चकार सर्वं प्रास्थानिकं कर्म महद्विधानात् ॥ क्षौमांबरो दर्भपवित्रपाणिर्महाप्र
याणाय गृहीतबुद्धिः ॥ ३७ ॥ निष्क्रम्य रामो नगरात्सिताभ्रच्छत्री व्यपातः शशिकोटिकांतिः ॥ राम
स्य सव्ये सितपद्महस्ता पद्मागता पद्मविशालनेत्रा ॥ ३९ ॥ पार्श्वेपसव्येरुणकंजहस्ता श्यामा य
यौ भूरपि दीप्यमाना ॥ शस्त्राणि शास्त्राणि धनुश्च बाणा जग्मुः पुरस्ताद्धृतविग्रहास्ते ॥ ४० ॥ वेद
श्च सर्वे धृतविग्रहाश्च प्रपुश्च सर्वे मुनयश्च दिव्याः ॥ माता श्रुतीनां प्रणवेन साध्वी ययौ ह
रिं व्याहृतिभिः समेता ॥ ४१ ॥ गच्छंतमेवानुगता जनास्ते सपुत्रदाराः सह बंधुवर्गैः ॥ अनाहूतद्वार
मिवापवर्गं रामं व्रजंतं प्रयुरात्तकामाः ॥ ४२ ॥ सांतःपुरः सानुचरः सभार्यः शत्रुघ्नयुक्तो भरतो
नुप्रापात् ॥ गच्छंतमालोक्य रमासमेतं श्रीराघवं पौरजनाः समस्ताः ॥ ४३ ॥ सबालवृद्धाश्च ययु
र्द्विजाग्र्याः सामात्यवर्गाश्च [illegible] समंत्रिणो ययुः ॥ सर्वे गताः क्षत्रमुखाः प्रहृष्टा वैश्यास्तथा शूद्रा
श्च तथापरे च ॥ सुग्रीवमुख्या हरिपुंगवाश्च स्नाता विशुद्धाः शुभशब्दयुक्ताः ॥ न कश्चिदासीद्भ
वि दुःखयुक्तो दीनोथवा बाह्यसुखेषु सक्तः ॥ ४५ ॥

४४॥

॥ ४० ॥ दिव्याः पुनयः सनकादयः श्रुतीनां माता
गायत्री ॥ ४१ ॥ अनावृतद्वारमिवापवर्गं तुल्यं व्रजंतं राममनुययुः ॥ ४२ ॥ अनुप्रापात् अन्वगच्छदित्यर्थः क्वचि

तथैव पाठः ॥ ४३ ॥ सामात्यवर्गः समंत्रिणो द्वि
जाग्र्या प्रयुः क्षत्रमुखाः ॥ क्षत्रं क्षत्रियाः मुखं मु
ख्या अग्रेसरा येषां ताः दृशाः कौशल्यादयः ॥ ४४ ॥ ४५ ॥

दुःखबाह्यसुखयोगाभावे हेतुः आनंदरूपानुगताः ॥ आनंदरूपरामममनुगताः ॥ तदनुगमनात् तदानंदप्रति
भासात्तद्योगः सर्वत्र वैराग्यं चेति भावः ॥४६॥ जग्मुरनुजग्मुः योरामममना रामंनयातोननुयातस्तादृशो
जंतुर्नासीदित्यर्थः ॥४७॥ राजनि गगनिगते खिलं पुरं शून्यं बभूव हरिनेत्रजातो शरयूं ॥४८॥ स्मृतं पावनं

आनंदरूपानुगता विरक्ता ययुश्च रामं पशुभृत्सवर्गैः ॥ भूतानि यद्दृष्यानि च यानि तत्र
ये प्राणिनः स्थावरजंगमाश्च ॥४६॥ साक्षात्परात्मानमनंतशक्तिं जग्मुर्विरक्ताः परमेकमी
शं ॥ नासीद्योध्यानगरे तु जंतुः कश्चित्तदा राममना नयातः ॥४७॥ शून्यं बभूवाखिलमेव
तत्र पुरं गते राजनि रामचंद्रे ॥ ततोतिदूरं नगरात्स गत्वा दृष्ट्वा नदीं तां हरिनेत्रजातां ॥४८॥ न
नंद रामः स्मृतपावनो तो ददर्श चाशेषमिदं हरिस्थं ॥ अथागतस्तत्र पितामहो महान्
देवाश्च सर्वे ऋषयश्च सिद्धाः ॥४९॥ विमानकोटीभिरपारपारं समावृते खं सुरसेविताभिः ॥
रविप्रकाशाभिरभिस्फुरत्स्वं ज्योतिर्मयं तत्र नभो बभूव ॥५०॥

॥विराड्रूपमात्मनो येन सः अशे
षमिदं जगत् हरिस्थं ददर्श पुरं शून्यं आत्मानं विराड्रूपं स्मृतवानित्यर्थः ॥४९॥ अपारपारं अवधि
रूपपारद्वयहीनं तारकामपि विमानावृतमासीत् ज्योतिर्मयं नक्षत्रगणप्रचुरमिव ॥५०॥ ॥

रा॰ अ॰ उ॰
४९

यत्र लोके पुण्यं कृत्वा स्वर्गे सर्वेभ्य अधिकं प्राप्तास्तेश्च नभः समावृतं चोपादपूरणे ॥५१॥ परिक्रामतु पर्यक्रामत् अल्लोपर्यगच्छदित्यर्थः ॥ तत्रैव हेतुगर्भं विशेषणं मनंतशक्तिरिति ॥५२॥ हे परमात्मन् परमेश्वर जगत्सृष्टि

स्वयंप्रकाशोर्महतां महद्भिः समावृतं पुण्यकृतां वरिष्ठैः ॥ ववुश्च वातास्च सुगंधवंतो ववर्षवृष्टिः कुसुमावलीनां ॥५१॥ उपस्थिते देवम[illegible]दंगनादे गायंत्सु विद्याधरकिन्नरेषु ॥ एवमस्तुपथ्यो सरयूजलं संस्पृश्य परिक्रामदनंतशक्तिः ॥५२॥ ब्रह्मा तदा प्राह कृतांजलिस्तं एमं [illegible] परात्मन्परमेश्वरस्त्वं ॥ विष्णुः सदानंदमयोसि पूर्णो जानासि तत्त्वं निजमैशमेकं ॥५३॥ तथापि दासस्य ममाखिलेश प्राकृतं वचो भक्तपरोसि विद्वन् ॥ त्वं भ्रातृभिर्वैष्णवमेकमाद्यम् विश्य देहं परिपाहि देवान् ॥५४॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥ ॥श्री॥

स्थितिलयकर्ता त्वमेवेत्यर्थः ॥ त्वमेशं एकं जंतवेंत्र स्वरूपं जानासि ॥५३॥ नन्वेवंत्र स्वज्ञस्य ब्रह्मरूपस्य कंपं शरीरपरिग्रहीत आह तथापीति भक्तानुग्रहार्थं मायया सर्वमिदं कृतमिति भावः ॥ अतो वैष्णवं देहं प्रविश्य देवान्पाहि रक्ष ॥५४॥ ॥ ॥

राम॰
४९

यरीतिपद्रत्सर्थः॥अथयापोपरोदेहस्तवरोचतेतंचापविश्वपाहिएवंविस्नुरूपंत्वांमांविना अन्येपुरुषान
जानंति॥५५॥एवंविस्नुस्वरूपंज्ञात्वाभक्त्याप्रणामतिसहस्रेति॥५६॥चक्षुंषिमुह्नन्स्वप्रभयेतिशेषः रामदे
हएवतस्याभूतोजातः॥अनेनविस्नुदेहवमापयादिभुजस्तवैशिष्ट्यतलोकरगोचरआसीदितिसूचितेभो

यद्वापरेवायदिरोचतेतंश्वविश्वदेहंपरिपाहिनस्त्वं॥त्वमेवदेवाधि पतिश्चविस्नुर्जानंति
नत्वांपुरुषाविनामां॥५५॥सहस्रकृत्वस्त्वनमोनमस्तेप्रसीददेवेशपुनर्नमस्ते॥पिताम
हमार्थ्यनयासरामः पश्यत्सुदेवेषुमहाप्रकाशः॥५६॥मुखांश्चचक्षूंषिदिवौकसांतदाब
भूवचक्रादियुतश्चतुर्भुजः॥शोभोवभूवेश्वरतल्यभूतः सौमित्रिरत्यद्भुतभोगधारी॥५७॥
बभूवतुश्चक्रदरौचदिव्यौकैकेयिसूनुर्लवणांतकश्च॥सीताचलक्ष्मीरभवत्पुरेवरामो
हिविस्नुःपुरुषःपुराणः॥५८॥सहानुजःपूर्वशरीरकेणबभूवतेजोमयदिव्यमूर्त्तिः॥विस्नुं
समासाद्यसुरेंद्रमुख्यादेवाश्चसिद्धामुनयश्चयक्षाः॥५९॥

॥गरुडपृष्ठशरीरंपूर्वगतोपिसतस्मिन
वसरेतेतदेहेनसंनिहितः॥५७॥दरःशंखः लवणांतःशत्रुघ्नः॥सीताचपुरेवलक्ष्मीरूपाऽभवत्सापित
त्कालेलक्ष्मीरूपेणसंनिहितासीदितिशेषः॥हियतोरामोविस्नुरित्यर्थः॥५८॥पूर्वशरीरकेणविस्नुदेह

रा ॥ ५१ ॥

दि॰॥ नन्वेवं भगवतो विष्णुरूपश्रामा वैकुंठवास इत्याख्याते एवं च सभापर्वणि भारते सर्वदिक्पालसभावर्णने यमसभाप्रस्तावे दाशरथी रामो यमसभायां दृष्ट इति नारदेनोक्तं तद्विरुध्यते इति चेत् अत्र वदामः अयतारपरिग्रहस्य हि मर्यादास्थापनद्वारा देवधेनुद्विजपालनं स्वाचरणेन लोकानां धर्ममर्यादाबोधनं च एतद्वतारपरिग्रहस्य हि प्रयोजनद्वयं इत्येव धेनद्विज पालनं स्वाचरणेन लोकानां धर्ममर्यादाबोधनं च एतर्थमेव तेषां तत्तत्कर्मानुष्ठाने प्रवृत्तिरन्यथा॥ अकामस्य भगवतः किं यज्ञाद्यनुष्ठानेन एवं च धर्मबोधना

पितामहाद्याः परितः परेशं स्तवैर्गृणंतः परिपूजयंतः॥ आनंदसंदोहवितपूर्णचित्ता बभूविरे प्राप्तमनोरथास्ते ॥दि॰॥ तदाह विष्णुर्हि गणो महात्मा॥ एते हि भक्ता मयि चानुरक्ताः॥ यांतु दिवं मामनुयांति सर्वे तिर्यक्शरीरा अपि तुल्ययुक्ताः ॥ दि१॥ श्रीरामायनमः ॥॥ छ॥

॥र्यंतदनुष्ठानवत आजन्मेदृशधर्मानुष्ठानस्यामुत्रलोकवासः॥ फलमिति बोधयितुं दाशरथिरामलक्ष्मणसमित्तायकेन मायिकेन चिद्धरीरेण तल्लोके वासे नास्ते॥ एवं मायणे एतदर्थकमंतु इति हासेषु उक्तत्वात् सर्वज्ञानां वाल्मीक्यादीनां भूतभावि सर्वार्थज्ञानमत्वादित्यन्यत्र विस्तारः तदेति तदा तस्मिन्समये विष्णुर्दुहिणं ब्रह्माणमाह मदनुगमना

वैकुंठसाम्यं वैकुंठसमानलोकं स्वार्थे ष्यञ् चातुर्वर्ण्यादित्वादार्णत्वात् [illegible] त्रेण स्वता
दृश लोकम्प्रवेशयत्स्वको ब्रह्मा सांतानिका लोकविशेषाः ॥९२॥ तेषां लोकानामुत्तमत्वमाह मदा पोपदि
प्यमानान् ब्रह्मलोकादूर्ध्वं दीप्यमानान् अपि च ये पि मनुष्यालयकाल एव मरणकाल एव न तु ततः

वैकुंठसाम्यं परमं प्रयांतु समाविशध्वा सुममाज्ञयाद्य ॥ श्रुत्वा हरेर्वाक्यमथाब्रवीत्कः
सांतानिकाख्यांस्तु विचित्रभोगान् ॥९२॥ लोकान्मदीयोपरि दीप्यमानां स्तस्मदाव युक्ताः कृ
तपुण्यपुंजाः ॥ ये चापि ते राम पवित्रनाम गृणंति मर्त्यालयकाल एव ॥९३॥ अज्ञानतो वापि
भजंतु लोकां स्तानेव योगैरपि चाधिगम्यान् ॥ ततोतिहृष्टा हरिऋक्षसाद्याः स्पृष्ट्वा जलं स
त्कलेवरास्ते ॥९४॥ प्रपेदिरे प्राक्तनमेव रूपं मदंशजाः केक्षहरीश्वरास्ते ॥ प्रभाकरं प्रा
प हरिप्रवीरः सुग्रीव आदित्यजवीर्यवत्वात् ॥९५॥ ततो विमग्नाः सरयूजले पुनरुः
परित्यज्य मनुष्यदेहं ॥ आरुह्य दिव्याभरणं विमानं प्रापुश्च ते सांतनिकाख्यलोकान्

प्रागपि कदाचित्तत्राप्यज्ञानतो वा अज्ञानत एव वा शारदा रवार्थे ते पवित्रनाम राम स्मेते तत्तद् गृणंति वंदंति
ते पि तानेव लोकान् योगैः प्राप्यान् भजंतु अनेना जन्माभ्यस्त योगांतकाले त्वन्नाम स्मर्त्तापि च समइति
सूचितं ॥९३॥९४॥ यो पदं शजः ॥ स तद्रूपमेव प्रापे सर्घः तदाह प्रभाकरमिति आदित्यजवीर्यवत्वात् आदि

स.टी. उत्तरकांडे ॥१६३॥

एवं दृष्टाः भगवद्दृष्ट्वा क्षीण सर्वपापाः विमुक्तसंगा भूत्वेति शेषः॥६७॥ अंजः शीघ्रं॥६८॥ अथ रामायणपाठफलमाह॥ यद्दृति तथा पापं कुर्वन्नेव रामायणश्लोकमपि पठन्विमुक्तसर्वपापः॥ रामस्य सालोक्यं प्रयाति राघव चोदितेन अंतर्यामि विधया रघुनाथप्रेरितेन॥६९॥७०॥ आप्तो माप्तः संबद्धो भविष्यद्दर्षो

तिर्यक्‌प्रजाता अपि राम दृष्टाज्जलं प्रविष्टा दिवमेव याता॥ द्विरस्त्वोजानपदाश्च लोकाराम संसमालोक्य विमुक्तसंगाः॥६९॥ स्तत्वा हरिं लोकगुरुं परेशं स्पृष्ट्वा जलं स्वर्गमवापुरंजः॥ एतावदेवोत्तरमाह शंभुः श्रीरामचंद्रस्य कथावशेषं॥६८॥ यः पादमप्यत्र पठेत्स पापाद्विमुच्यते जन्मसहस्रजातात्॥ दिने दिने पापचयं प्रकुर्वन् पठन्नरः श्लोकमपीह भक्त्या॥६९॥ विमुक्तसर्वाघचयः प्रयाति रामेति सालोक्यमनन्यलभ्यं॥ आख्यानमेतद्रघुनायकस्य कृतं पुराराघवचोदितेन॥७०॥ महेश्वरेण प्रभविष्यदर्थं श्रुत्वा तु रामः परितोषमेति॥ रामायणं काव्यमनंतपुण्यं श्री शंकरेण विहितं भवान्यै॥७१॥ वक्तुश्च पापौघः श्रवणमात्रात्पापैर्विमुच्यते जन्मशतोद्भवैश्च॥ ७

॥ यत्र तदाख्यानं श्रुत्वा रामः परितोषमेति भगवंतं सर्वगतं रामं भावयामीति बुध्यायो वाचयति तद्वाचितं तत्सर्वगत्वात् श्रुत्वा वाचकस्यो परितोषमेति तत्परितोषे च तस्य सर्वार्थसिद्धिरिति भावः॥ अनंतपुण्यं वाचकश्रोत्रारनंतपुण्यप्रदमित्यर्थः॥७१॥ ॥

रा॰अ॰उ॰
पृ२

अध्यात्मरामं तत्वद घटितम ध्यात्मरामायणाख्यं पुराणमित्यर्थः श्रोतुर्लिखितुश्चापि प्रसन्नः प्रसन्नः सदा समीपेस्थितो भूत्वा श्रियमातनोतीत्यन्वयः ॥७२॥७३॥७४॥ इतिश्री मत्सकलराजविराजद्धुरणसमर्थेसा

भक्त्यापठेद्यः शृणुयात्सपापैर्विमुच्यतेजन्मशतोद्भवैश्च ॥ अध्यात्मरामेयपठतश्च नित्यं श्रोतुश्च भक्त्यालिखितुश्च रामः ॥७२॥ अतिप्रसन्नश्च सदा समीपेसीतासमेतः श्रियमातनोति ॥७३॥ रामायणंजनमनोहरमादिकाव्यं ब्रह्मादिभिः सुरवरैरपिसंस्तुतंच ॥ श्रद्धान्वितः पठतियः शृणुयात्तुनित्यं विष्णोः प्रयातिसदनं सविशुद्धदेहः ॥७४॥ इतिश्रीमदध्यात्मरामायणेउमामहेश्वरसंवादे उत्तरकांडेनवमः सर्गः ॥९॥ अध्यात्मोत्तरकांडे सर्गः अष्टसंख्ययापरिक्षिप्ताः ॥ क्रतुशतसंख्याः श्लोकाः पुराणसंख्याश्चपुरहरेणोक्ताः ॥ पार्वत्यै परमेश्वरेणगदिते ह्यध्यात्मरामायणे कांडैः सप्तभिरन्वितेतिशुभदे सर्गाः श्रुतुः षष्टिकाः ॥ श्लोकानांतुशतद्वयेन सहिता न्युक्तानि चत्वारिंसाहस्राणि समाप्तितः श्रुतिशते सूक्तानितत्वार्थतः ॥ ॥७॥ संवत् १८ ॥५२॥ मितिपौषसुदिनवमी ॥ ७ ॥ ७ ॥

दिविरुदावली विराजमानस्य हिम्मतिवर्म्मणः पुत्रस्य श्रीरामवर्म्मणः ॥ कृता बध्यात्मरामायणसेतौ उत्तरकांडेनवमः सर्गः ॥९॥ ॥

वै८
राम
पृ२

एवं दृष्ट्वा भगवद्दृष्ट्या क्षीणसर्वपापाः विमुक्तसंगा भूत्वेति शेषः ॥ ६६ ॥ अंजः शीघ्रं ॥ ६७ ॥ अथ रामायणपाठफलमाह । य इति तथा पापं कुर्वन्नेव रामायणश्लोकमपि पठन् विमुक्तसर्वपापः रामस्य सालोक्यं प्रयाति राघवचोदितेन अंतर्यामिविधया रघुनाथप्रेरितेन ॥ ६९ ॥ ७० ॥ आस्तां तावत्संवादो भविष्यदर्थो

तिर्यक्प्रजाता अपि राम दृष्ट्वा जलं प्रविष्टा दिवमेव याताः ॥ दृष्ट्वा जानपदाश्च लोका रामं समालोक्य विमुक्तसंगाः ॥ ६६ ॥ स्नात्वा हरिं लोकगुरुं परेशं दृष्ट्वा जलं स्वर्गमवापुरंजः ॥ एतावदेवोत्तरमाह शंभुः श्रीरामचंद्रस्य कथावशेषं ॥ ६७ ॥ यः पादमप्यत्र पठेत्स पापाद्विमुच्यते जन्मसहस्रजातात् ॥ दिने दिने पापचयं प्रकुर्वन् पठन्नरः श्लोकमपीह भक्त्या ॥ ६८ ॥ विमुक्तसर्वाघचयः प्रयाति रामेति सालोक्यमनन्यलभ्यं ॥ आख्यानमेतद्रघुनायकस्य कृतं पुरा राघवचोदितेन ॥ ७० ॥ महेश्वरेणास्तभविष्यदर्थं श्रुत्वा तु रामः परितोषमेति ॥ रामायणं काव्यमनंतपुण्यं श्रीशंकरेण विहितं भवान्यै ॥ ७१ ॥ भक्त्या पठेद्यः शृणुयात्स पापैर्विमुच्यते जन्मशतोद्भवैश्च

॥ यत्र तदाख्यानं श्रुत्वा रामः परितोषमेति भगवंतं सर्वगतं रामं अभियामीति बुध्या यो वाचयति तद्वाचितं तत्सर्वगत्वात् श्रुत्वा वाचकस्यो परितोषमेति तत्परितोषे च तस्य सर्वार्थसिद्धिरिति भावः ॥ अनंतपुण्यं वाचकश्रोत्रोरनंतपुण्यप्रदमित्यर्थः ॥ ७१ ॥ ॥

अध्यात्मरामा० उत्तरकांड समाप्त

[OrderDescription]
,CREATED=18.02.20 14:15
,TRANSFERRED=2020/02/18 at 14:34:24
,PAGES=106
,TYPE=STD
,NAME=S0002854
,Book Name=M-2694-RAMAYAN UTTARKAND
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF

FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF

FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF

FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF

FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,